Published by—
Mul Raj Jain, M. A., LL. B.,
Secretary,
Jain Vidya Bhavan,
Krishan Nagar, Lahore

Price Re. 1/4

Printer—
Deva Raja M. A.
Nili Bar Press,
LAHORE.

Introduction

Citrasenapadmāvatīcaritra is a short romance dealing with the story of Citrasena and Padmāvatī, and laying stress on the importance of śīla, chastity. The Jains regard (i) dāna, charity; (ii) śīla, chastity; (iii) tapas, austerity and (iv) bhāvanā, sincerity of heart as great virtues around which the Jain poets have built a network of didactic tales—legendary and semi-historical.

SYNOPSIS

Once upon a time, king Vīrasena ruled over Vasantapura. His wife was Ratnamālā Their only son, Citrasena, found a friend in Ratnasāra, the son of the king's minister. Both the friends used to roam about together in the town. They were so beautiful that the ladies of the town

would feast their eyes upon them from the roofs of their houses. The elders of the city did not approve this conduct of the prince and approached the king with the request that Citrasena be taught to behave properly. Hearing this the king got enraged, and in a fit banished him from his country.[1] Citrasena, however, never learnt the reason of his father's anger, but thought, "Surely my father is not to blame. It is the result of my own karman. One must reap what one sows". Consequently without much ado he took leave of his father as well as of his mother. The latter out of affection gave him seven jewels to serve him on his way. Thence he went to his friend, Ratnasāra, to bid him farewell. But Ratnasāra would not allow the prince to depart all alone saying, "a friend in need is a friend indeed." He, therefore, accompanied him to the forest. (1–43)

1. This is a good instance showing that the king respected his people's advice and would yield to it even if it went against his own dear ones. Cf. Agadakumara's banishment (Meyer : Hindu Tales p. 237-8)

After passing through towns and villages in the course of their wanderings, they came into a dense forest, and took shelter under a tree. The prince being fatigued soon fell asleep. Ratnasāra, however, kept awake to guard the prince. At midnight he heard from afar the sound of merry-making of a kinnara-party and waking the prince up drew his attention to it. To enquire into the matter they followed in the direction of the sound and reached a splendid Jina temple in which gods and kinnaras had assembled to celebrate the aṣṭāhnika festival with great eclat. There Citrasena saw an exquisite image of a girl which displayed the skill of the artist. He fell in love with the girl represented by the image[2], and fainted away. When he was brought to his senses, he resolved to marry that girl or to die. Ratnasāra tried in vain to dissuade him

2. For falling in love with a girl on seeing her portrait, see Tawney : Ocean of story IV pp. 132 and note; Mallishena : Nagakumaracarita I (Pathak Com. Volume, Poona, 1934, p. 102).

from his mad and impracticable resolve. (44-58)

As luck would have it, an omniscient monk came there and delivered a sermon. Ratnasāra availed himself of the opportunity and enquired from the monk about the identity of the image. The kevalin said, "In Ratnapura there are the king Padmaratha and his qeen Padmaśrī. They have a daughter Padmāvatī by name. When she attained the blooming youth, the king became anxious to get her a suitable match. Portraits of many young and handsome princes were shown to her, but none of them pleased her, as she hated men.[3] The other day she went to the temple of Śāntinātha, and was seen by Sāgara, a sculptor from Kāncana come there on pilgrimage. Knowing that the charming girl hated all men, he felt pity for her and made this image of her" (59—91)

3. For girl's hatred towards men, Cf. Tawney: Ocean of story III 260 and note 2, VII 35, 217; Nagakumaracarita IV (Pathak Com. Vol. p. 111)

On hearing this, Citrasena fainted once again. The kevalin proceeded to tell the previous story of the prince. "In the Campaka forest, on the bank of a lake, there lived a pair of swans. Once upon a time, a merchant put up there with his caravan. After a bath, he worshipped the Jina and prepared his meal. Before taking it he was looking for an atithi to share it with him, when a sage who had fasted for a month passed that way. The merchant was exceedingly glad to see that sage and supplied him food that was acceptable to him. The pair of the swans praised this action of the merchant and won great merit. (92--107)

"After some time the female swan brought forth young ones. One day, unfortunately a fire broke out in the forest. The male bird went out to fetch water to extinguish the fire. When he did not return for a long time, the female suspected his faithfulness towards her and affection for the young ones. She concluded that males are faithless and resolved

on her own part never to see a male again. While entertaining such thoughts she was burnt alive along with her offspring. When, however, the male returned it was already too late. He found to his great dismay that his mate and the young ones had been burnt by the conflagration. This tragedy shocked him so much that his heart failed. It was this pair of swans that was born as Citrasena and Padmāvatī in their present birth[4], as a consequence of the virtue won by praising the merchant's act of charity. "On seeing the image and hearing the story of the last birth, Citrasena was reminded of his own part in it and fainted." (108-121)

Thus acquainted with Padmāvatī he asked the kevalin about the means by which he

4. Cf. Tawney : Ocean of story III pp. 291 ff. Offspring of a pair of swans was carried off by a wave of the sea. The male bird asked the female not to lament the loss so much. At this the latter killed herself thinking that males had no affection for their offspring and mates. In the next birth she was reborn as a princess and resolved not to marry. The male bird was reborn as a prince. On meeting her he reminded her of their previous life by a word picture and married her.

could be united with his beloved. The kevalin replied that her hatred towards men dated from her previous life when as a female swan she suspected her mate's faithfulness and resolved never to see a male again. As a remedy, he suggested to Citrasena that if he displayed to her the picture depicting the scenes of their former life, she might remember those events and marry him. (122—129)

Taking leave of the sage, they proceeded on their journey and reached the outskirts of Ratnapura where they passed the night in a temple dedicated to the yakṣa Dhanañjaya. During the night all kinds of spirits—bhūtas, vetālas, rākṣasas, kinnaras etc—came there to have a jolly time. Some of them sang and others danced. The prince was awakened by this noise and went to the assembly of the spirits who treated him as a guest. Dhanañjaya blessed him with a boon that he would always turn out victorious on the battlefield. (130--150)

At daybreak they entered the city and heard the royal proclamation by beat of drum that whosoever cured the princess Padmāvatī of her hatred towards men, would get her together with half the kingdom (151--153)

Citrasena got a beautiful picture made depicting how the pair of swans had met their death in their previous life. Everybody who saw the picture, admired it greatly. Padmāvatī, too, saw him carrying the picture, recalled her previous life and fainted away. When she came to her senses, she realised the true cause of her hatred for men. Meanwhile the prince disappeared and Padmāvatī felt the pangs of separation as she no longer hated men. (154-174)

Then on an auspicious day, Padmāvatī's father arranged a svayamvara which was attended by a large number of princes from various countries. When they had taken their seats in the proper order, Padmaratha

declared, "Whosoever succeeds in bending my ancestral bow, Vajrasāra, shall win my daughter." Then Padmāvatī, decorated with lovely ornaments and clothes, entered the svayamvara-compound and doubted if that tender prince could bend that strong bow. The princes of Lāṭa, Karṇāṭa, Kāśmīra and Aṅga came forward one after the other to try their luck but failed miserably. Padmāvatī was feeling dejected not to find her cherished lover come forward. At last, however, Citrasena appeared there with his friend, and strung the bow. Padmāvatī joyfully garlanded him. (175-219)

The other princes could not tolerate this success of an unknown youth and took up arms against him, who, though alone, overpowered them all. Meanwhile a bard announced that the unknown prince was Citrasena, the son of Vīrasena of Vasantapura. This satisfied the vanity of the princes. Then the marriage was celebrated with great eclat. (220-234)

Some time later, Citrasena thought of going to his own parents, and took leave of his father-in-law. Padmaratha advised his daughter to serve her father- and mother-in-law and to treat her husband as a god, and bade them farewell. (235-243)

On their homeward journey, they stayed one day under a banyan tree. At nightfall, all went to sleep except Ratnasāra who kept watch. On the banyan tree there lived the yakṣa Gomukha and his mate Cakreśvarī. The latter asked Gomukha to tell her who the prince was and whither he was bound. Gomukha related the life-story of Citrasena and remarked. "His mother is dead. His father has married a second wife Vimalā by whom he has a son Guṇasena. Vimalā is trying to get the kingdom for her own son. In order to gain her end she will persuade Vīrasena to get rid of Citrasena. When he reaches his city (i) Vīrasena will offer him a very vicious horse to ride on; (ii) the porch of the gate will be caused to fall on the prince's

head while he passes under it[5]; and (iii) Vimalā will serve him with poison in sweets. Lastly (iv) there will be the fear of his being bitten by a poisonous snake. If he escapes unhurt through the efforts of his friend, he shall become king. But if ever the friend mentions these events to anybody, he himself shall be turned into stone." Ratnasāra heard all this. (244--269)

At daybreak the party resumed its journey and in due course reached Vasantapura. Vīrasena went out to meet his son and offered him a vicious horse to ride on. But Ratnasāra secretly replaced this horse by a gentle one. When thev were about to pass through the city-gate, Ratnasāra struck the prince's horse in the face so severely

5. The motif of causing a porch to fall on an undesirable person while he is passing under it is pretty frequent in folklore and literature Cf. Mudrarakshasa II where it is reported that Rakshasa's secret agents intrigued unsuccessfully to murder Candragupta dy dropping down the coronation arch while he passed under it. Raja Naunihal Singh, the grandson of Maharaja Ranjit Singh met his death by a similar tragedy. There might be some political intrigue behind it.

that the horse stopped and covered a few steps backwards without changing the direction. Suddenly the porch fell upon the people. After reaching the city, Citrasena went to see his step-mother who invited him to a dinner. In response to the invitation, he went to her palace along with his friend and retinue. He was served sweets mixed with poison, but was saved from eating them by the prudence of Ratnasāra who, removing the poisonous sweets, placed in Citrasena's dish pure ones which he had taken with him. (270-298)

Thus defeated in his attempts at the life of his son the king was feeling remorse one day, when the last Tīrthaṅkara, Mahāvīra, happened to visit Vasantapura. Hearing of his arrival, Vīrasena went to listen to his sermon which moved him so much that he installed Citrasena on the throne, and himself, followed by his queen, joined the Order. (299—322)

Thenceforward, with Ratnasāra as his

minister, Citrasena began to rule over Vasantapura. He always strove to do good to his people and led a pious life full of meritorious deeds such as charity, worship of the Jinas and the like. Citrasena, Padmāvatī and Ratnasāra used to spend their time together; they never separated from each other even for a single moment. One night when the king and the queen were asleep, Ratnasāra served them as a guard with a sword in his hand. It so happened that a black serpert was seen coming down the chain of the bed. Ratnasāra at once killed it with his sword. As ill luck would have it, a drop of blood fell on the upper part of Padmāvatī's leg. While Ratnasāra was removing it, Citrasena woke all of a sudden and enquired what the matter was. Ratnasāra was in a fix; if he told the truth he would be petrified as the yakṣa had prophesied, but if he did not tell it he would incur the wrath of his master and thereby stood in danger of his life. But he was not a man to swerve from the path of duty and virtue. He could not tell a lie

before Citrasena. So he made up his mind to narrate the whole incident even at the cost of his life. (323—345)

With a firm determination, he began to tell the yakṣa's prophesy and as he passed from one incident to the other,his body commenced turning into stone from the feet to the head. As soon as the narration ended, Ratnasāra fell on the ground completely petrified. (346—59)

At this the king repented and lamented the loss of his dear and wise friend, Ratnasāra. Finding no remedy to escape from the pangs of separation, he decided to commit suicide. Padmāvatī, however, dissuaded him from committing suicide, saying, "The cowards alone resort to suicide under a difficulty; the wise try to overcome it by other means. I am sure that if we begin giving charity to the poor, the Brahmans, the monks and others, among them, there may come some one who could restore your friend to life. Our object will then be fulfilled." The king agreed to this and opened up his treasures to charity; but

among the innumerable suppliants there was none who could infuse Ratnasāra with life. One day it occurred to Citrasena that perhaps the very yakṣa, who had foretold the calamities, might prescribe a remedy. Entrusting the old minister with the burden of the kingdom, he started on the journey and reached the banyan tree where the yakṣa and yakṣiṇī lived. At night, at the latter's request the yakṣa narrated the whole story, how Citrasena was saved from the fourfold calamity by his friend, Ratnasāra; how the latter was petrified on disclosing the secret when compelled to do so, and how he would regain his original form if a virtuous lady, with her son in her lap, touched all his limbs. Hearing this) talk the prince returned to his capital.(360-401

Fortunately Padmāvatī was pregnant those days and in due course of time she gave birth to a charming son. Great celebrations were held—worship was performed in all the Jina temples for eight days; the poor people were fed; large sums were given in charity. On

the eleventh day a feast was arranged. The child was baptised Dharmasena. Citrasena, who had never forgotten Ratnasāra thought that that was the proper opportunity to bring him back to life. The statue of Ratnasāra was properly bathed. Padmāvatī took her son in her lap, meditated upon the Parameṣṭhin mantra, and declared, "Listen, O protectors of the directions, the sun, the moon, planets, saviours of the fields, vetālas, vaimānikas, gods and all ! If my conduct in mind, speech and action is pure, then Ratnasāra must come to life at the mere touch of my hand !" No sooner did she touch him than he regained his consciousness and all became happy. (402—419)

One day as the king was sitting in his court, a messenger came with the news that Siṃhaśekhara of Siṃhapura had revolted and waylaid travellers. Citrasena was greatly enraged to hear this news. He ordered his army to march against the offending chieftain. Some days later, when the army was

encamped in the Daṇḍaka forest, the king heard at night the moaning of a man. He went in the direction of the sound and found at a small distance a man fettered and nailed to a tree. The king at once set the man free and enquired who he was and why he was in such a plight. Thereupon the man narrated his story thus: "I am Hemamālī, the son of Hemaratha and his wife Hemamālā of Hemapura situated in the North range of the Vaitāḍhya mountain. With my wife Hemacūlā I was enjoying all the pleasures of life. One day we went out on a pilgrimage to the Nandīśvara continent. Ratnacūḍa, a wicked Vidyādhara, was enamoured of the beauty of my wife and followed us. Finding a suitable opportunity he put me in fetters and eloped with my wife." This made the king furious with rage. He marched against the Vidyādhara and finding him seated under a tree challenged him, "O adulterer! Where can you go?" In the fight that ensued, Citrasena overpowered his enemy.

Fearing death at the hands of Citrasena, Ratnacūḍa put a blade of grass in his mouth and sued for mercy. (420—449)

Life being granted to him Ratnacūḍa related his own story: "I had learnt the Vidyās on the Gandhamādana mount, but on my way back, I lost my lore on being attracted towards Hemamālī's wife. I fettered and nailed Hemamālī and eloped with his wife. But on enquiry she turned out to be a girl belonging to my own gotra. On seeing you, King Citrasena, coming to the help of Hemamālī, all my friends ran away and I am left alone to seek forgiveness." Citrasena praised his virtuous conduct and let him go his own way. (450—461)

As a mark of gratitude Hemamālī presented to Citrasena a couple of novelties—a magic cot by which one could fly at will from one place of pilgrimage to another through the air, and a rod that could kill and bring again to life anybody. Ratnacūḍa also presented to the king a pill by eating which a

man could change his form. At last they took leave of Citrasena and repaired to their respective cities. (462—472)

Then Citrasena resumed his march against his enemy, Siṃhaśekhara, and conquered him with the help of the magic rod. He was, however, pleased at the valour of the opposing forces, revived the dead soldiers and appointing Siṃhaśekhara as his governor in Siṃhapura returned to his capital. (473—494)

He was received by his wife, son, minister and people with great eclat. Citrasena and Padmāvatī devotedly undertook to observe the twelve vows of a Śrāvaka and paid their homage to monks. (495—510)

One day they decided to test the magic power of the cot and resolved to visit the various places of pilgrimage. Through the magic power of the cot they reached the Aṣṭāpada mount where Bharata had built the temple, called Siṃhaniṣadyā. They worshipped and praised the Jinas and returned home.(511-541)

On another day, Citrasena was informed about the arrival of a great monk, Damasāra. He paid homage to the sage and listened to his sermon. He was so much affected by it that he set his son Dharmasena on the throne and himself together with Padmāvatī and Ratnasāra joined the Order. In due course they all attained Mokṣa. (542-557)

Manuscript Material :

The present edition of Citrasenapadmāvatīcaritra by Buddhivijaya is based on the following MSS—

A : belonging to the Bhandar at Ambala City[6]. Leaves 16; 14 lines to a page; 40 letters in a line. Paper, ordinary. Script, Jain. Legible. Colophon at the end:

संवत् १८२४ ना वर्षे मासोतममासे शुक्लपक्षे नवमितिथौ वार बुधे लपीकृतं ॥ शकलभट्टारक पुरंदरभट्टारक भाल तिलकायमान श्री श्री श्री १०८ श्री श्री विजयप्रभसूरीश्वर तत् शिष्य पंडित

6. Banarsi Das Jain: A Catalogue of Manuscripts in the Panjab Jain Bhandars, Part I, Panjab University, Lahore, 1939. No. 838.

श्री ५ श्री प्रेमविजय गणि तत् शिष्य पं० श्री ५ भाणविजय गणि तत् शिष्य पं० मेघविजय गणि वाचनार्थं: ॥

B: of the Sumativijaya Bhandar at Zira in the Ferozepur District[7]. Leaves 25; 12 lines to a page; about 35 letters in a line. Paper, ordinary, white. Script, Jain, quite clear and bold. Colophon at the end:

लीο माहाराज जी श्री कमल विजय जी ॥ श्री ॥ श्लोक ५६० ॥ संवत् १६४६ ॥

The MSS from Ambala City, Nakodar, Patti and Zira Bhandars[8] were also consulted. They were, however, copies of Rājavallabha's version.

Popularity of the story :

The story of C. and P. seems to have been fairly popular as can be seen from its following versions, extant or referred:-

1. By Pāṭhaka Rājavallabha. The story was originally contained in his Ṣaḍāvaśya-

7. Ibid No. 835.
8. Ibid Nos. 833, 834, 836, 837 and 839.

kavṛtti [9], and was later versified into about 500 stanzas. Printed (Jamnagar, 1924) with a good deal of interpolations not found in the MSS examined by me. The printed text also states that the story was taken from शीलतरङ्गिणी, cf. कथा कृता शीलतरंगिणीतः (v. 1229)

Rājavallabha [10] was a pupil of Mahimacandra of the Dharmaghoṣa gaccha and wrote this poem in Sam. 1524 (1467 A. D.).

2. By Buddhivijaya : the present work.
3. By Bhaktivijaya: a Guj. version. [11]
4. By Nayavijaya : a Guj. version. [12]
5. Citrasena-catuṣpadī : a Hindi poem. [13]
6. By Pūrṇamalla : a Skt. work, so far undiscovered [14]
7. Hindi rendering of no. 6, printed at Surat, 1939.

---

9. M. D. Desai : Jain Sahitya no Sankshipta Itihasa (Gujarati) p. 516.
10. Peterson : III Report ap. p. 215; Skt. MSS in the Skt. College, Calcutta, no. 58.
11. Peterson: III Report ap. p. 215; लींबडी ना जैन ज्ञान भंडारनी हस्तलिखित प्रतियो नुं सूची पत्र No. 834.
12. S. R. Bhandarkar: Deccan College Catallogue, 1888, part IV, No. 349.
13. R. L. Mitra: Notices of Skt. MSS, No. 3035;
14. चित्रसेनपद्मावतीचरित्र (Hindi) Surat, Intro. p. 3.

Author:

Buddhivijaya, the author of our poem, was a disciple of Jaganmalla, also known as Paṇḍita Gajamalla who was himself a disciple of Vijaya Dāna Sūri in the line of the famous Vijaya Hīra Sūri. He composed this poem in Sam. 1660 (1603 A. D.), while Vijaya Sena Sūri was the Paṭṭadhara (Verses 561-64).

Nothing further is known about Buddhivijaya.

Language :

Our poem is composed in what is called the Jain Sanskrit. Bloomfield published a study of it in the Festschrift Jacob Wackernagel pp. 220 ff. Its chief peculiarities are the following :

1. Occurrence of words peculiar to Jainism, e. g., गणाधीश(2), प्रासुक (104, 106), केवलज्ञान (95), अष्टापद (515), क्षीणाष्टकर्मन् (508), सम्यक्त्व (539), परमेष्ठिमन्त्र (413), भव्य (322), अमारिपटहोद्घोष (330), निरारम्भ (95), अच्युत (555) etc etc.

2. Use of grammatical forms not found in classical writers, e. g., पितृमातृ० (43), दिशोदिशम्

(84), वीणां वादयन्ति (140), सन्मान (409), सन्मानिता (297), सन्मुखम् (261) etc etc.

3. Words and idioms taken from Prakrits and vernaculars, e.g.—

(i) आवली, आवलिका (262, 267) 'calamity.' It is not the same word as आवलि, आवलिका 'row, string,' but it is a back-formation from Pkt. आवलिया from Skt. आपद् + ल + इका. Cf. Pkt. विज्जुलिया from Skt. विद्युत् + ल + इका. The use आवलीनां चतुष्टयम् (267) in the same sense as आपच्चतुष्टयम् (358) supports the suggestion.

Also Cf. Hindi औली 'calamity'; औली टलना 'calamity becoming ineffective.' Platts in his Hindustani-English Dictionary records:

"H. औल [S. उप + स्रव ?] m. Great calamity (as a) plague, cholera etc.

"H. आवली or औली f. Any great calamity = औल; mortal danger = अली (H)."

(ii) लग्न(230)'began, started'. It corresponds to Hindi लगना'to begin.' In this sense the word is used in Pūrṇabhadra's version of the Pañcatantra[15], e.g., स्वापिमि लग्न:(122, 18), योजयति लग्न:

15 ed. Hertel, Harvard Oriental Series XI, XII,

(268, 10) अनावृष्टिः सम्पद्यते लग्ना (?) Buddhivijaya's use of लग्न conforms more to the vernaculars than its use in the Pañcatantra does In the latter case the word follows a verb in the present indicative just as the future suffix गा derived from गत in Hindi, whereas Buddhivijaya uses लग्न along with the infinitive as in Hindi and Gujarati Campakaśreṣṭhikathānaka : नृत्यं कर्तुं लग्नः I-Z.D.M.G. 65 p. 30.

(iii) मुत्कलापय् (315, 383) 'to take leave of' baffled scholars for a long time As the root is almost always found governing an accusative, it was wrongly taken to be as उत्कलापय् by regarding the anusvāra of the accusative as redundant and analysing the मु of मुत्कलापय् into anusvāra and उ. It was then explained as a denominative verb from उत्कलाप adj. 'with an upraised (spread out) plumage of a peacock.' Benfey, however, derived it from उद् + कल्[16] ।

The verb is peculiar to the Jain Skt where it is quite frequent, and means 'to take leave of.' Cf. Kathākośa (ed Jagdish Lal, Lahore,

16. Benfey: Pancatantra II 520; Buehler : Pancatantra V, note to p. 48 *l.* 11.

in press,) pp. 6,11,76; Pañcatantra V p.48 *l*.11.

It still exists in modern Indo-Aryan, cf. Hindi मुकलावा m. 'bringing home a wife'; Hindi, Marathi मोकला adj. 'free.'

It probably comes from Pkt. मुक्क (Skt *मुक्क from मुच् + क्त) with the addition of ल. For a detailed discussion, see New Indian Antiquary, Vol. I, pp. 342–3.

(iv) छुट् (267) 'to escape.' The Dhātupāṭha gives the root the sense 'to cut off.' Both Weber and Hertel compare it with Guj. छुटवुं 'to release' and its derivatives.[17] The present use is akin to Hindi छूटना 'to escape' and not to छोड़ना 'to release.' Other examples of its use are Pārśvanāthacaritra[18] I 177, Prabandhacintāmaṇi (Bombay) p. 20, Rauhiṇeyacarita 365, Campakaśreṣṭhikathānaka[20] para 76 etc. Its causal is छोटय् (433) 'to release'.

(v) उद् + तृ (356) 'to descend'. This sense comes from Pkt. where ओयरइ and उत्तरइ are interchange-

17. Festschrift Jacob Wackernagel p. 222.
81 By Bhavadevasuri, Benares 1912.
19. Jamnagar 1908; Bhavnagar 1916.
20. ed. Hertel in Z. D. M. G. Vol. 65 pp. 1 ff.

able. Also cf. Pariśiṣṭaparvan, Jacobi's Introduction p. 9.

(vi) पीठ (322) 'back, surface.' Cf Hindi पीठ 'back' from Skt. पृष्ठ.

(vii) सार (62) adj. 'excellent.'

(viii) घन (212) adj. 'great, intense' Cf. Guj. घणा 'much'.

(ix) कष्टं न याति मित्रस्य (378) 'the misery of the friend does not disappear.'

(x) बलं कृत्वा (201) 'exerting force, showing energy.'

(xi) प्राघूर्णा (144) 'guest'.

(xii) हक्कित adj. (446) 'challenged, called.' Cf. Hindi हांकना 'to challenge.'

4. Excessive use of participial construction, e. g. in verses 116-22 there occurs no finite verb.

5. Proverbs and quotations from old Sanskrit writers, Pkts and old vernaculars, e.g., Skt. verses 19,38, 73 and 307 are from the Pañcatantra; 216 from Manusmṛti VI 46; 364 included in Subhāṣita-ratna-bhāṇḍāgāra, Bombay, p. 95 v. 21; 343 included in Subhā-

ṣita-padya-ratnākara. Ujjain, III, p. 1070. Pkt. verses 34,173; 548 (Uttarādhyayana III,1); 549 (Daśavaikālika VIII 35); 550 (Sūtrakṛtāṅga I 2,1). Old vernaculars 21, 42, 58. Proverbs 22b, 31, 78b, 112b, 155b, 242b, 298 etc.

6 New words: Almost every work in Jain Skt. edited or translated on mordern lines contains a list of words not recorded in Skt. dictionaries. A list of such words occurring in CP excluding those listed by H. M. Johnson in her translation of Triṣaṣṭi. Vol. I, pp. 456-77 is given below.

अमारिपटहोद्घोष (330, 407) proclamation by beat of drum forbidding killing of living creatures.

अष्टापद (515.516,538) name of a mountain.

अष्टाह्निक adj. (51) (celebration or worship) lasting for 8 days.

आमूलचूलम् (122, 398) from bottom to top.

आवली (267, 325, 380, 392), आवलिका (262, 266, 348, 350, 354, 355) calamity.

कंसाल (141) a musical instrument.

कुमर (52 etc) prince.

क्रम (29 etc) foot.

घन adj. (212) great, intense.

चतुर्विंशति f. (521) an idol representing all the 24 Tirthankaras.

छुट् (267, 433) to escape.

दिशोदिशम् adv. (84, 176) in all directions.

देवच्छन्द (521) a temple consecrated to a god.

नन्दी (197) a musical instrument.

निरारम्भ (95, 547) an act involving, or a person causing, no injury to animal life.

नैषेधिकी f. (526) A word repeated thrice by Jains at the threshold of a religious place and suggesting the discontinuation of all worldly activity while a person is in.

पश्चात्पाद (278) backward steps.

पाश्चालिका f. (53) an idol, a puppet.

पीठ (322, 359) back, surface.

प्रगुणी कृ (54) to bring to senses.

प्रवृत्ति f. (511) plan (?).

प्रहरिक (249) प्राहरिक m. (333) watchman.

प्राघूर्ण m. (144) guest.

प्रातिहार्य (520) eight formalities of reception performed by gods at the arrival of a Jina.

प्रासुक adj. (104, 106) free from animal life.

बलं कृ (201) to exert force.

बीटक (24) a folded betel leaf with arecanuts representing a royal command.

ब्रुड् (463) to sink.

महोद्धर्ष (177) festival, great rejoicing.

मुत्कलापय् (315, 383) to take leave of.

मोहनीयकर्मन् (121) a kind of karman which infatuates or deludes the soul.

रञ्जित adj. (302) affected.

लग्न (164, 230) began.

वालय् (443) to cause to be returned.

सन्मान, सन्मानिता (297, 409) wrongly spelt for सम्मान, सम्मानिता.

सन्मुखम् (261 etc.) wrongly written for सम्मुखम्.

समवसरण (303) an assembly-hall built by gods, where a kevalin preaches.

सम् + उद् + तृ (356) to descend.

सामुदायिककर्मन् (555) deeds done by several persons collectively. Their fruit also is enjoyed collectively.

सार adj. (62) excellent.

सिंहनिषद्या (526) name of a temple.

सुखासन (241) palanquin.

स्तूप n. (525) m. according to M. W.

स्फिट् (153, 391, 393) to destroy the effect of.

हक्कित adj. (446) shouted to, challenged.

हृदयस्फोट (119, 166) heart-break.

Lastly I thank the custodians of the bhandars at Ambala city, Nakodar, Patti and Zira for kindly lending me the MSS of this work.

Mul Raj Jain

॥ श्रीवीतरागाय नमः ॥

श्रीबुद्धिविजयरचितम्

चित्रसेनपद्मावतीचरित्रम्

कल्याणकमलागेहं निःसन्देहं[1] सदोदयम् ।
कल्याणविलसद्देहं वन्देहं वृषभप्रभुम् ॥१॥
पुण्डरीकमहानन्दं पुण्डरीकवराम्बकम् ।
पुण्डरीकगणाधीशं नत्वा तत्त्वाकरं मुदा ॥२॥
महासेनस्य शीलेन महासेनासमुन्नतेः ।
चित्रसेननरेशस्य चित्रकारिकथां ब्रुवे ॥३॥
जम्बुद्वीपाभिधे द्वीपे क्षेत्रे भरतनामनि ।
वसुधातलविख्यातो देशो नाम्ना कलिङ्गकः ॥४॥
धनधान्यगृहोदारं गजगोकुलसङ्कुलम् ।
तत्रास्ति क्षितिशृङ्गारं वसन्तपुरपत्तनम् ॥५॥
यत्र काम्रः सारिसीरे कलिर्यत्र वनान्तरे ।
मारिः सारिफले यत्र न पुनर्नगरीजने ॥६॥

---

1 Z निःसन्देहसदो० ।

मनोभीष्टाशना भव्यवासनाः प्रवरासनाः ।
व्यवहारिजना यत्र वसन्ति धनदोपमाः ॥७॥
न्यायवान् शीलसम्पन्नः प्रजापालनलालसः ।
उदारमानसस्तत्र वीरसेननरेश्वरः ॥८॥
रूपश्रीसुन्दराकारा भाग्यसौभाग्यमन्दिरम् ।
रत्नमाला प्रिया तस्य सतीजनमतल्लिका ॥९॥
शशीव सज्जनानन्दी रूपनिर्जितमन्मथः ।
दाता शूरस्तयोः पुत्रः कुमारश्चित्रसेनकः ॥१०॥
वासवस्य गुरुर्मन्त्री श्रेणिकस्याभयो यथा ।
बुद्धिसाराभिधस्तस्य जातो मन्त्रीश्वरस्तथा ॥११॥
रत्नसारः सुतस्तस्य रत्नसारशरीररुक् ।
कुशाग्रतीक्ष्णधीः[1] सौम्यः सर्वशास्त्रविशारदः ॥१२॥
अन्योन्यमभवत्प्रीती राजन्नमन्त्रिपुत्रयोः ।
मध्याह्नोत्तरकालीना छायेव ववृधे च सा ॥१३॥
नगरान्तर्भ्रमन्तौ तौ रममाणौ परस्परम् ।
गृहोपरि समारुह्य विलोकन्ते[2] पुराङ्गनाः ॥१४॥
समीक्ष्याथासमीचीनं विचार्य चतुरैर्नरैः ।

1 A ०तीक्ष्णधीः । 2 Z ०कते ।

समागत्य सभासीनो भूमिनेता नमस्कृतः ॥१५॥
प्रजापालेन सानन्दं कुशलप्रश्नपूर्वकम् ।
पृष्टं सकललोकानां समागमनकारणम् ॥१६॥
तेषामेको बभाषेथ वृद्धश्चारुविचारवित् ।
देव विज्ञप्तिकामेवं कुर्वते नगरीजनाः ॥१७॥
रूपमीनध्वजो देव तव सूनुर्भ्रमत्यसौ ।
नगरान्तर्दिवानक्तं रक्षणीयः प्रयत्नतः ॥१८॥

यतः —

यस्मिन् कुले यः पुरुषः प्रधानः
स एव यत्नात् किल रक्षणीयः ।
तस्मिन् विनष्टे च कुलं विनश्येन्
न नाभिभङ्गे ह्यरकाः स्थिराः स्युः ॥१९॥

इति श्रुत्वा महीनाथश्चिन्तयामास मानसे ।
धन्यास्ते जीयते यैस्तु धनयौवनयोर्मदः ॥२०॥
भरिजुव्वण घरि पवर धणु अरु सामीसम्माणु ।
तिहु गव्वि जि न गव्विया तिहिं पुरिसां सुविहाणु ॥२१॥
प्रजामुद्वेजयेद्यस्तु कृत्यं तेन सुतेन किम् ।
कर्णत्रुटिर्भवेद्येन काञ्चनेनापि तेन किम् ॥२२॥

भृकुटीभीषणो राजा यावज्जातः सभान्तरे ।
तावन्नन्तुं समायातः कुमारो भूपतेः क्रमौ ॥२३॥
भूपः पराङ्मुखीभूयादापयत्तस्य रोषतः ।
पत्रत्रितयसम्बद्धं बीटकं नन्दनस्य च ॥२४॥
वज्रपात इवाकस्माद्दुःखित[1]श्चिन्तयत्यदः ।
अपराधं विना तातो रुष्टः किमु ममोपरि ॥२५॥
अथवा न पितुर्दोषो दोषोयं मम कर्मणाम् ।
पूर्वाचीर्णानि कर्माणि समायान्त्युदयं यतः ॥२६॥
यद् यावद् यादृशं येन कृतं कर्म शुभाशुभम् ।
तत् तावत् तादृशं तस्य फलं यच्छति देहिनः ॥२७॥
कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥२८॥
विचिन्त्येति निजे चित्ते समालम्ब्य च धीरताम् ।
प्रणम्य भूपतेः पादौ नन्तुं मातुः क्रमौ गतः ॥२९॥
राजरोषं समाकर्ण्य सुतोक्तं साथ दुःखिता ।
पृथिव्यां पतिता मूर्च्छां गता सुस्थोपचारतः ॥३०॥
ग्रामे वासो दरिद्रत्वं मूर्खत्वं कलहो गृहे ।

1 A ०स्मा दुरित० ।

पुत्रैः सह वियोगश्च दुःसहं दुःखपञ्चकम् ॥३१॥
रुदन्त्युच्चैःस्वरं शोकातुरा नन्दनवत्सला ।
पुत्रमोहाद्ददौ रत्नसप्तकं सम्बलाय सा ॥३२॥
एकाकी खड्गमादाय प्रणम्य जननीं निजाम् ।
चचाल पुरतो मार्गे सोऽश्रुसम्पूर्णलोचनः ॥३३॥

यदुक्तम्—

जणणी जम्मुप्पत्ती पच्छिमनिद्दा सुभासिअं वयणं ।
मणइट्ठं माणुस्सं पंच वि दुक्खेहिं मुच्चंति ॥३४॥
धीरत्वमवलम्ब्याथ स गच्छन्नगरान्तरा ।
स्मृत्वा मन्त्रिसुतं मित्रं मन्त्रीश्वरगृहे गतः ॥३५॥
रत्नसाराख्यमित्रेण पृष्टो भूपतिनन्दनः ।
चिन्तातुरमना मित्र दृश्यसे केन हेतुना ॥३६॥
कथं ग्रामान्तरं गन्तुं प्रवृत्तः सेवकोज्झितः ।
निवेद्य मे निजोदन्तं निःशल्यं मानसं कुरु ॥३७॥
सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु ।
स्वामिनि च सुप्रसन्ने निवेद्य दुःखं सुखी भवति ॥३८॥
ततः सकलवृत्तान्तमाकर्ण्य कुमरोदितम् ।
बभूव रत्नसारोऽपि मित्रदुःखेन दुःखितः ॥३९॥

कुमारः प्राह हे मित्र त्वया स्थेयं गृहे सुखम् ।
अहं देशान्तरं यामि अभिमानधनः पुनः ॥४०॥
जगाद रत्नसारोपि तिष्ठामि सदने कथम् ।
सुखं वा यदि वा दुःखं सोढव्यञ्च त्वया सह ॥४१॥
हेज हियाली परिखिइ खल वयणे जल साउ ।
मित्त कुवेला[1] परिखिइ सुहड्ड लागइ घाउ ॥४२॥
पितृ[2]मातृकुटुम्बादिस्नेहं दत्वा जलाञ्जलिम् ।
दृढीकृत्य निजं चित्तं प्रच्छन्नौ चलितौ ततः ॥४३॥
अविलम्बप्रयाणेन ग्रामाकरपुराणि तौ ।
मुक्त्वा[3] भीमाटवीं प्राप्तौ स्थितौ सायं तरोस्तले ॥४४॥
मार्गश्रान्तशरीरस्तु सुप्तो भूपतिनन्दनः ।
सावधानमना मन्त्रिसुतः प्राहरिकः स्थितः ॥४५॥
जाग्रत् मन्त्रिसुतो दूरे शुश्राव किन्नरध्वानिम् ।
विस्मितो भूपतेः पुत्रं विबोध्याकथयत्स तम् ॥४६॥
तं श्रुत्वा कुमरोवादीत् स्वभावात् कौतुकप्रियः ।
अहं तत्र गमिष्यामि स्थातव्यञ्च त्वयात्र भोः ॥४७॥
मन्त्रिपुत्री बभाषे तं न त्वामेकाकिनं पुनः ।

1 A कुवेला । 2 Z पितु० । 3 A मुक्त्वा ।

अरण्ये श्वपदाकीर्णे प्रेषयामि सुलोचन[1] ॥४८॥
हसित्वा कुमरोवादीत् क्षत्रियाणां भयं कुतः ।
इत्युक्त्वा चलितस्तत्र मित्रश्चापि तमन्वगात् ॥४९॥
दृष्टं ताभ्यां शुभं शुभ्रं युगादिजिनमन्दिरम् ।
अनेकदेवदेवेन्द्रैर्मण्डितं किन्नरैर्वृतम् ॥५०॥
गायन्ति गायनाः सम्यग् नृत्यन्ति त्रिदशाङ्गनाः ।
अष्टाह्निकादिने तत्र महोत्सवपुरस्सरम् ॥५१॥
प्रविश्य विधिना तत्र नमस्कृत्य जिनेश्वरम् ।
समित्रः कुमरस्तत्रालोकयामास[2] चारुताम् ॥५२॥
प्रासादमण्डपे तत्र सद्विज्ञानविनिर्मिता ।
दृष्टा पाञ्चालिका चैका कुमारेण मनोहरा ॥५३॥
रूपेण मोहितस्तस्या मूर्च्छितो राजनन्दनः ।
शीतोपचारतो रत्नसारेण प्रगुणीकृतः ॥५४॥
मूर्च्छायाः कारणे पृष्टे कुमारोकथयच्च तम् ।
एषा पाञ्चालिका कस्याः कृता केनानुमानतः ॥५५॥
यस्या रूपानुमानेन कृता पाञ्चालिका त्वसौ ।
सा कुमारी मयोद्वाह्यान्यथा मे काष्ठभक्षणम् ॥५६॥

1 Z ०नम् ।   2 Z ०त्र लो० ।

मन्त्रिपुत्रो बभाषे तं मित्र माङ्गीकृथा वृथा ।
आकाशपुष्पसङ्काशमेतत् कार्यं हि दुष्करम् ॥५७॥
हिया मणोरह[1] तं करे जं करवा समरत्थ[2] ।
सग्गि सुरतरु मोरिया कोइ पसारइ हत्थ ॥५८॥
इतश्च राजपुत्रस्य पुण्यप्राग्भारयोगतः ।
समागात् केवलज्ञानी साधुस्तत्र सुरैर्वृतः ॥५९॥
कुमारः सह मित्रेण नमस्कृत्य मुनीश्वरम् ।
विनयाभिनमन्मौलिरुपविष्टः कृताञ्जलिः ॥६०॥
देशनान्तेथ पप्रच्छ रत्नसाराभिधः सुधीः ।
कस्या रूपानुमानेन केन पाञ्चालिका कृता ॥६१॥
एतद्वचनमाकर्ण्य बभाषे मुनिपुङ्गवः ।
वत्साकर्णय मद्वाक्यं कर्णसारसुखप्रदम् ॥६२॥
वर्त्तते काञ्चनाकीर्णं काञ्चनाभिधपत्तनम् ।
वसान्ति यत्र चत्वारो वर्णा विज्ञानकोविदाः ॥६३॥
अनेकचारुविज्ञानविश्वकर्मावतारकः ।
सूत्रधारो गुणाढ्यानो गुणश्रीस्तस्य च प्रिया ॥६४॥
तत्कुक्षिसम्भवाः पञ्च नन्दना विश्वविश्रुताः ।

1 Z मनोरथ। 2 Z असं०।

प्रथमो धनदेवाख्यो धनसारो द्वितीयकः ॥६५॥
तृतीयो गुणदेवश्च चतुर्थस्तु गुणाकरः ।
पञ्चमः सागरो नाम कलानामेकसागरः ॥६६॥
पञ्चापि पठिताः कर्म कर्मठाः प्रवराङ्गनाः ।
अर्पितार्थभराः पित्रा कृताः सर्वे पृथक् पृथक् ॥६७॥
तेषां मध्ये लघुः पुत्रः सागराख्यो गुणाधिकः ।
विज्ञातानेकविज्ञानो जिनधर्मरतः सदा ॥६८॥
दयार्द्रहृदया नित्यं पतिचित्तानुगामिनी ।
तस्य प्रिया प्रियालापा[1] नाम्ना सत्यवती सती ॥६९॥
अथ रत्नपुरद्रङ्गे राजा पद्मरथोभवत् ।
पद्मश्रीस्तस्य राज्ञी च पद्मा पद्मापतेरिव ॥७०॥
तयोः पद्मावती पुत्री पद्मबन्धुरलोचना ।
जातरूपवपुर्वर्णा[2] सम्प्राप्ता यौवनश्रियम् ॥७१॥
अन्येद्युस्तां सभायातां सारशृङ्गारभासुराम् ।
दृष्ट्वा पद्मरथो राजा वरचिन्ताकुलोभवत् ॥७२॥

यतः—

कुलञ्च शीलञ्च सनाथता च
विद्या च वित्तञ्च वपुर्वयश्च ।

1 A ०लापी । 2 Z ०रूपरथाप्तु० ।

वरे गुणाः सप्त विलोकनीया-
स्ततः परं भाग्यवती च कन्या ॥७३॥
मूर्खनिर्धनदूरस्थशूरमोक्षाभिलाषिणाम् ।
त्रिगुणाधिकवर्षाणां न देया खलु कन्यका ॥७४॥
कुलजातिविहीनानां मातृपितृवियोगिनाम् ।
गेहिनीपुत्रयुक्तानां न देया खलु कन्यका ॥७५॥
सदैवोत्पन्नभक्ष्याणामालस्यवशवर्त्तिनाम् ।
वहुवैराग्यरङ्गाणां न देया खलु कन्यका ॥७६॥
इतिनीतिमतिर्भूपः स्वसुतागुणरञ्जितः ।
अन्येद्यू राजपुत्राणां चित्ररूपाण्यदर्शयत् ॥७७॥
केषामपि हि रूपाणि पद्मावत्याश्च नारुचन् ।
प्रशस्यान्यपि शस्यानि ज्वरवत्या यथा स्त्रियः ॥७८॥
एवं शतसहस्राणां चित्ररूपप्रदर्शनात् ।
न भिद्यते[1] मनस्तस्याः स्निग्धभाण्डमिवाम्भसा ॥७९॥
पुरुषद्वेषिणीं पुत्रीं तदा विज्ञाय चेष्टया ।
राजा परिकरश्चापि दुःखशल्येन शल्यितः ॥८०॥
यात्रार्थं शान्तिनाथस्य सागरः सूत्रकृद्वरः ।
सकलत्रः समित्रश्च गतो रत्नपुरेऽन्यदा ॥८१॥

1 A Z ०त्ति ०।

पूजयित्वा जिनाधीशं यावत् स्तोत्रैः स्तवीत्यसौ ।
तावत् पद्मावती कन्या स्त्रीवृन्दालङ्कृतागता ॥८२॥
अग्रतः खड्गहस्ताश्च नरवेषधराङ्गनाः ।
भूरिहक्कारवैर्घोरैर्लोकान् वित्रासयन्ति च ॥८३॥
भयभीता जनाः सर्वे नष्टा यावद्दिशोदिशम् ।
सागरः शुकरूपस्थोपश्यत्तस्याः कुतूहलम् ॥८४॥
तद्रूपविमोहितश्चित्ते सूत्रधारो व्यचिन्तयत् ।
किन्नरी नागकन्या वा विद्याधर्यथवा किमु ॥८५॥
धात्रा यदीदृशी सृष्टा कथं दोषेण दूषिता ।
विचारं सागराह्वानश्चकारैवं स्वचेतसि ॥८६॥
पुरुषद्वेषदोषेण चारुरूपादिका गुणाः ।
अस्या भूपालनन्दन्या जाता सर्वे निरर्थकाः ॥८७॥
यथा दीपं विना गेहं यथा सूर्यं विना दिवा ।
पुत्रं विना कुलं यद्वत्तथा नारी पतिं विना ॥८८॥
एवं विचिन्तयंश्चित्ते यावत्तिष्ठति सागरः ।
शान्तितीर्थङ्करं नत्वा कन्या तावद् गृहं गता ॥८९॥
कृत्वा यात्रां जिनेशस्य भक्तिं साधर्मिकस्य च ।
सागरः कृतकृत्योथाजगाम निजमन्दिरम्[1] ॥९०॥

1 Z निजं मन्दिरम् ।

तेन पाञ्चालिकारूपं निर्मितं सागरेण च ।
पद्मावत्यनुसारेण तद्रूपं नास्ति कुत्रचित् ॥९१॥
पाञ्चाल्याः किल वृत्तान्तं श्रुत्वा भूधवनन्दनः[1] ।
मूर्च्छामवाप्य तत्कालं पपात पृथिवीतले ॥९२॥
शीतोपचारतः सावधाने भूधवनन्दने[1] ।
रत्नसारः स दुःखात्मा पुनः पप्रच्छ तं मुनिम् ॥९३॥
भगवन् मत्सखा चासौ पाञ्चालीरूपदर्शनात् ।
मूर्च्छया किं पपातेति सन्देहो विद्यते मम ॥९४॥
सत्कृपालो कृपां कृत्वा केवलज्ञानभास्कर ।
सन्देहं मम चित्तस्य निरारम्भ निराकुरु ॥९५॥
ततोवोचन्मुनिस्वामी सुधामधुरया गिरा ।
शृणु वत्स यथातथ्यं वृत्तान्तं सुहृदस्तव ॥९६॥
तथास्मिन् भरते क्षेत्रे देशे द्रविडनामनि ।
चम्पापुर्याः समासन्ने चम्पकाभिधकाननम् ॥९७॥
चम्पकाशोकपुन्नागनारङ्गागुरुचन्दनैः ।
माकन्दकदलीनालिकेरराजादनैर्युतम् ॥९८॥
जम्बुजम्बीरखुर्जूरबीजपूरद्रुमाञ्चितम् ।
सालतालतमालागनक्तमालतरुश्रितम् ॥९९॥

1 Z भूधरन० ।

जपापाटलवासन्तीजातिकेतकवासितम् ।
दाडिमक्रमुकद्राक्षामण्डपादिकमण्डितम् ॥१००॥
तस्मिन् वने सरः सारं निर्मलोदकपूरितम् ।
बद्धप्रवरसोपानं पद्मिनीषण्डमण्डितम् ॥१०१॥
हंसाश्च कलहंसाश्च चक्रवाका बकास्तथा ।
सारसप्रमुखाश्चान्ये क्रीडन्ति तटसंस्थिताः ॥१०२॥
अन्यस्मिन् दिवसे सार्थाधीशः कश्चित्समागतः ।
बहुसार्थसमायुक्तः स्थितस्तत्र सरोवरे ॥१०३॥
स्नात्वा प्रासुकनीरेण कृत्वा च जिनपूजनम् ।
भोजनावसरे जाते साध्वागमनमीहते ॥१०४॥
समारुह्य सरःपालीमतिथिं तस्य पश्यतः ।
समागात् पुण्ययोगेन मुनिर्मासोपवासकृत् ॥१०५॥
सत्प्रमोदप्रफुल्लाङ्गः शुद्धभावसमन्वितः ।
प्रासुकान्नं सुपात्रस्य सार्थनाथः प्रदत्तवान् ॥१०६॥
वृक्षस्थहंसहंसीभ्यां दृष्ट्वा तद्दानमुत्तमम् ।
कृत्वानुमोदनां सम्यग् भूरिपुण्यमुपार्जितम् ॥१०७॥
तस्मिन् वने वटोस्त्येकः कृत्वा तत्र कुलायकम् ।
आसन्नप्रसवा हंसी मुमोचाण्डानि तत्र च ॥१०८॥
पक्षोष्मणाथ संसेव्य विनिर्माय च बालकान् ।

स्नेहाद्धंसान्विता हंसी पुपोष प्रतिवासरम् ॥१०९॥
पूर्वकर्मविपाकेन वंशजालीनिघर्षणात् ।
दावानलो ज्वलद्ज्वालाकरालः काननेभवत् ॥११०॥
तत्प्रतापाकुलो हंसो हंसीं प्रत्याह सत्वरम् ।
बालरक्षामहं कुर्वे व्रज त्वं जलहेतवे ॥१११॥
हंसमाह ततो हंसी गच्छ त्वं वारिहेतवे ।
अपत्यपालने माता समर्था न पिता क्वचित् ॥११२॥
स्थिता हंसी गतो हंसः स्नेहाकुलितमानसः ।
सरो गत्वा जलं लात्वा यावदायाति वेगतः ॥११३॥
दवतापाकुला हंसी मनस्येवं व्यचिन्तयत् ।
निःस्नेहः कातरो हंसो मुक्त्वा मां स गतः क्वचित् ॥११४॥
तन्नूनं पुरुषाः सर्वे निर्लज्जा निर्दयाशयाः ।
पापिष्ठा मुखमेतेषां न कदापि विलोक्यते ॥११५॥
ज्वलद्दावानले दग्धापत्यपालनतत्परा ।
दानानुमोदनापुण्यात् सम्प्राप्ता मानुषं भवम् ॥११६॥
अथ रत्नपुरद्रङ्गे राज्ञः पद्मरथस्य च ।
पद्मश्रीकुक्षिसम्भूता जाता पद्मावती सुता ॥११७॥
जलमादाय हंसोथ गतो न्यग्रोधपादपे ।
हंसीं तावन्मृतां दृष्ट्वा बालकीपरिसंस्थिताम् ॥११८॥

अतिस्नेहाकुलः सोपि हृदयस्फोटतो मृतः ।
दुःसहं हि प्रियादुखं किं पुनः सुतसंयुतम् ॥११६॥
दानानुमोदनापुण्यप्रभावात् प्रवराशयः ।
चित्रसेनकुमारोयं सञ्जातो राजनन्दनः ॥१२०॥
मोहितो मोहनीयेनाभीष्टरूपविलोकनात् ।
रत्नसार ! सखा तेसौ मूर्च्छितस्तेन हेतुना ॥१२१॥
आमूलचूलवृत्तान्तं श्रुत्वा पूर्वभवोद्भवम् ।
जाता जातिस्मृतिस्तस्योपदेशात् प्रवरान्मुनेः ॥१२२॥
करामलकवत्सर्वं पश्यन् पूर्वभवं निजम् ।
प्रमोदाच्चित्रसेनस्तं ववन्दे मुनिपुङ्गवम् ॥१२३॥
यतीश ! यत्त्वयावाचि सत्यं ज्ञातं मयाखिलम् ।
परं केन प्रकारेण मिलिष्यति मम प्रिया ॥१२४॥
केवल्यूचेधुना सा तु नरद्वेषेण वर्त्तते ।
स्त्रीणां स्तुतिपरा नित्यं पुंसां निन्दापरायणा ॥१२५॥
कुमारोकथयन्नाथ ! निन्दायाः कारणं किमु ।
मुनिराह भवे पूर्वे जलार्थं प्रेषितो भवान् ॥१२६॥
दावाग्नितापिता हंसी मनस्येवं व्यचिन्तयत् ।
निःस्नेहो बालकांस्त्यक्त्वा जलव्याजात् पलायितः॥१२७॥
तेन वैरेण सा कन्या नरद्वेषपरायणा ।

सन्तापमतुलं मातृपित्रोश्च कुरुतेऽन्वहम् ॥१२८॥
यदा प्राग्भवमालिख्य पटे त्वं दर्शयिष्यसि ।
लब्ध्वा जातिस्मृतिं त्वां तु परिणेष्यति सा तदा ॥१२९॥
एवंविधञ्च वृत्तान्तं श्रुत्वा कर्णामृतोपमम् ।
हृष्टचित्तो मुनिं नत्वा यथागतमगादसौ ॥१३०॥
कुमारो मन्त्रिपुत्रं तं बभाषे मित्रवत्सल ।
कथं पद्मावती कन्या परिणेया मयाधुना ॥१३१॥
रत्नसारस्ततोवोचत् कुमार ! शृणु मद्वचः ।
गत्वा रत्नपुरद्रङ्गे कुरु कार्यं यथोचितम् ॥१३२॥
चेतसीति विनिश्चित्य प्रस्थितौ तत्पुरं प्रति ।
अनेकाश्चर्यसम्पूर्णां पश्यन्तौ पथि भूमिकाम् ॥१३३॥
कियद्भिर्वासरैस्तौ च प्राप्तौ रत्नपुरान्तिके ।
पश्यन्तौ नगरोद्यानं तरुराजिविराजितम् ॥१३४॥
वापीकूपतडागानि प्रपादेवकुलानि च ।
क्रमादालोकयन्तौ तौ प्राप्तौ गोपुरसन्निधौ ॥१३५॥
धनञ्जयस्य तत्रास्ति यक्षस्यायतनं वरम् ।
रात्रौ तत्कोणके सुप्तौ मन्त्रिसूराजनन्दनौ ॥१३६॥
रात्रेः कृष्णचतुर्दश्या व्यतीते प्रहरद्वये ।
मिलिता भूतप्रेतालराक्षसाः किन्नरादयः ॥१३७॥

मासे मासे च यात्रार्थमागता यक्षमन्दिरे ।
हृष्टाः कुर्वन्ति ते वाद्यं गीतं नृत्यञ्च सुन्दरम् ॥१३८॥
कुमारश्चित्रसेनोपि वाद्यनादेन बोधितः ।
अपश्यत् पर्षदां तत्र सुपर्वाधीश्वरोपमाम् ॥१३९॥
केपि वीणामुपादाय वाद्यन्ति मधुरस्वरम्[1] ।
केपि गीतानि गायन्ति गम्भीरालापपूर्वकम् ॥१४०॥
मृदङ्गतालकंसालविशालध्वनिपेशलम् ।
धनञ्जयाख्ययक्षाग्रे नृत्यं कुर्वन्ति केपि च ॥१४१॥
कौतुकाकुलचित्तोपि कुमारः साहसाग्रणीः ।
करवालं करे कृत्वा तत्सभायां मुदागमत् ॥१४२॥
सर्वे यक्षादयो देवास्तं समालोक्य विस्मिताः ।
सुन्दरः कुमरः कोयं पृच्छन्तीति परस्परम् ॥१४३॥
धनञ्जयस्तदा दध्यौ प्राघूर्णो मम मन्दिरे ।
आगतः पूजनीयोयमेतदाचरणं सताम् ॥१४४॥
इति चेतसि सञ्चिन्त्य तुष्टोवोचद्धनञ्जयः ।
तुभ्यं यद्रोचते वत्स मार्गय त्वमशङ्कितः ॥१४५॥
इतियक्षवचः श्रुत्वा कुमारो विदुषाम्वरः ।
विनयाभिनमन्मौलिरेतद्वचनमब्रवीत् ॥१४६॥

1 The editor suggests वादयन्ति मधुस्वरम् ।

अद्य मे सफलं जन्म सफलं मेद्य जीवितम् ।
अद्य मे सफला यात्रा यज्जातं तव दर्शनम् ॥१४७॥
विनयावर्जितो यक्षो हृष्टोवोचदिदं वचः ।
कुमार मत्प्रसादेन संग्रामे विजयोस्तु ते ॥१४८॥
राजराजं मुदा नत्वा वरं लब्ध्वा वराशयः ।
चित्रसेनकुमारोथ समागान्मित्रसन्निधौ ॥१४९॥
वीरसेनसुतः साररत्नसारसुहृत्पुरः ।
वरलब्ध्यादिकं सर्वं वृत्तान्तञ्च न्यवेदयत् ॥१५०॥
पूर्णा यक्षपतेर्यात्रा विभाता च विभावरी ।
कुमारो मन्त्रिपुत्रश्च प्रापतुस्तौ चतुष्पथे ॥१५१॥
तस्मिन्नवसरे तत्र नृपः पद्मरथाभिधः ।
पुत्रीविवाहमुद्दिश्य घोषणामित्यकारयत् ॥१५२॥
यः कोपि पुरुषद्वेषं सुतायाः स्फेटयेन्नरः ।
अर्धराज्यं सुतां तस्मै निःसन्देहं ददाम्यहम् ॥१५३॥
आकर्ण्य घोषणामेवं हर्षपूरितमानसः ।
रत्नसारमुखं दृष्ट्वा कुमार इदमब्रवीत् ॥१५४॥
वाञ्छितार्था हि सिध्यन्ति प्रायः पुण्योदये नृणाम् ।
मित्र साहाय्यमेतत्ते तत्सुवर्णस्य सौरभम् ॥१५५॥
एवमुक्त्वा कुमारेण स्मृत्वा तद्ज्ञानिनो वचः ।

गत्वा चित्रकरोपान्ते पटश्चित्रापितः पटुः ॥१५६॥
आदाय तं पटं पाणौ गुप्तवेषो भ्रमन् पुरे ।
चारुचातुर्यगीताद्यैररञ्ज नगरीजनान् ॥१५७॥
श्रुत्वा तद्भाग्यसौभाग्यचातुर्यादिकलां जनात् ।
दर्शनोत्कण्ठिता तस्य जाता पद्मावती कनी ॥१५८॥
पूर्वप्रेमानुबन्धेन समाकार्य निजान्तिके ।
दर्शनाच्चित्रसेनस्य सञ्जाता सानुरागिणी ॥१५९॥

यतः—

लोचनान्येव जानन्ति सम्बन्धं पूर्वजन्मनः ।
यतो हर्षं प्रियं दृष्टे वहन्ते चाप्रिये रुषम् ॥१६०॥
साश्चर्यमानसाः सख्यो विलोकन्ते परस्परम् ।
अनेन पुरुषेणास्या नरद्वेषो निराकृतः ॥१६१॥
तत्करस्थपटेपश्यत् कन्या काननमुत्तमम् ।
नालिकेरकदल्यादितरुमण्डलमण्डितम् ॥१६२॥
अनेकपङ्कजाकीर्णं कमनीयं सरस्तथा ।
वटवृक्षश्च सापत्यहंसहंसीमनोहरम् ॥१६३॥
तत्र दावानले लग्ने हंसोगान्नीरहेतवे ।
बालरक्षाकृते हंसी स्थिता दावानलाकुला ॥१६४॥
शीघ्रं पानीयमादाय यावदायाति पादपे ।

तावद्बालकसंयुक्ता दग्धा हंसी दवाग्निना[1] ॥१६५॥
दृष्ट्वा दवाग्निना[1] दग्धां प्रियां बालोपरिस्थिताम् ।
दुःखपूराकुलो हंसो हृदयस्फोटतो मृतः ॥१६६॥
एवं चित्रपटं दृष्ट्वा जातजातिस्मृतिस्मृतिः ।
मूर्च्छयाकुलचित्ता सा पतिता पृथिवीतले ॥१६७॥
शीतोपचारतः सुस्थीभूता चिन्तयतीति सा ।
मद्वियोगातुरस्वान्तो हा हा हंसो मृतः किमु ॥१६८॥
पुरुषेषु मुधा द्वेषः प्रचक्रे मूढया मया ।
एष चित्रधरो धीरो जीवो हंसस्य नान्यथा ॥१६९॥
सखीभिः सार्द्धमित्येतां वार्त्तां यावत्करोत्यसौ ।
कुत्रापि कुमरस्तावद् गतो मित्रसमन्वितः ॥१७०॥
क्षणान्तरे कुमारी तं यावत् पश्यति नाग्रतः ।
नरश्चित्रधरं तावत्तद्वियोगाद् रुरोद सा ॥१७१॥
क्व गतश्चित्तचौरोसौ ममोषित्वा च मानसे ।
धूर्त्तेन धूर्त्तिता बाढं हा सखि त्वं तमानय ॥१७२॥
[2]वसिऊण मुज्झ हियए जीवं गहिऊण कत्थ चलिओ सि ।
सहवासघरविडंबग गंगंमि गओ न सुज्झहसि ॥१७३॥
एवञ्च विलपन्ती सा भर्तुर्दुःखेन दुःखिता ।

1 Z दावा० । 2 A adds यतः before verse 173.

सखीभिर्मधुरैर्वाक्यैः प्रबोध्य स्थापिता भृशम् ॥१७४॥
राजा विज्ञातवृत्तान्तः स्वयम्वरणमराडपम् ।
प्रारेभे सर्वसामग्रीशोभितं शुभवासरे ॥१७५॥
भूपानां भूपपुत्राणामाकारणकृते ततः ।
प्रेषिताः सेवकाः शीघ्रं भूमीशेन दिशोदिशम् ॥१७६॥
इति ज्ञात्वा सदाकाराः सशृङ्गारा नरेश्वराः ।
स्वयम्वरमहोद्धर्षा[1]लोकनाकुलमानसाः ॥१७७॥
चतुरङ्गचमूयुक्ताः प्राप्ता रत्नपुरान्तिके ।
पश्यन्तः कौतुकं सम्यक् स्थिता उद्यानभूमिषु ॥१७८॥
आगतानां नरेशानां चित्तवित्तानुसारतः ।
नृपः पद्मरथाह्वानो रचयामास गौरवम् ॥१७९॥
चित्रिता विविधैर्वर्णैः पाञ्चालीभिर्मनोरमाः ।
निर्मलस्फटिकस्तम्भा मण्डिता यत्र मण्डपे ॥१८०॥
स्वर्णचित्राङ्कितस्फारपट्टैराच्छादितोभितः ।
चारुचन्द्रोदयः सूत्रधारैर्व्यरचि मण्डपः ॥१८१॥
नानाविधमणिश्रेणिनिबद्धवसुधातलः ।
प्रभूतस्वप्रभापुञ्जनिर्नाशिततमोभरः ॥१८२॥
निर्मितानेकविज्ञानरम्यवातायनाद्भुतः ।

1 Z adds the gloss महोच्छव in the margin.

हेमदण्डमनोहारिध्वजराजिविराजित:[1] ॥१८३॥
समश्रेणिस्थितानेकमञ्चकावलिकान्वितः ।
प्राकारकपिशीर्षालीप्रतोलीप्रतिभासितः ॥१८४॥
कालागुरुतुरुष्कादिप्रोल्लसद्धूपधूपितः ।
पञ्चवर्णस्फुरद्भूरिप्रसूनप्रकराञ्चितः ॥१८५॥
विलोक्यैवम्विधं लोकाः स्तवयन्तीति मण्डपम् ।
देवाधीशविमानं किं मेदिनीतलमागतम् ॥१८६॥
क्वचिद्गीतैः क्वचिन्नृत्यैः सङ्गीतविधिभिः क्वचित् ।
क्वचिद्वादित्रनिर्घोषैः शोभिते भूपमण्डपे ॥१८७॥
शुभेह्नि शुभवेलायां मञ्चकेषु यथोचितम् ।
उपविष्टा नृपाः सर्वे भूरिभूषणभूषिताः ॥१८८॥
अथ पद्मरथो राजा जगाद जगतीपतीन् ।
वज्रसाराभिधं चापमस्त्यस्माकं क्रमागतम् ॥१८९॥
मण्डपस्थमिदं चापमारोपयति यो नृपः ।
परिणेष्यति मत्पुत्रीं स रूपादिगुणान्विताम् ॥१९०॥
एवमाकर्ण्य भूपालाः स्वभुजाबलगर्विताः ।
धनुर्वेदविदो जाताश्चापारोपणतत्पराः ॥१९१॥
अथ पद्मावती कन्या धन्यंमन्या वराम्बरा ।

1 A ०राजवि० ।

उदारस्फारशृङ्गारा सखीजनसमन्विता ॥१९२॥
सद्यस्कग्रथितानेकप्रसूनानां कराम्बुजे ।
वरमालां दधाना च सावधाना वरेक्षणे ॥१९३॥
स्वर्णकम्कवालसत्पाणिवेत्रधारिपुरस्सरा ।
मातङ्गगमनायाता स्वयम्वरणमण्डपे ॥१९४॥
यथा दीपशिखा ध्वान्ते प्रकाशयति मन्दिरम् ।
तथा पद्मावती कन्या प्रकाशं मण्डपेकरोत् ॥१९५॥
बलिष्ठसुभटारोप्यं मण्डपस्थमिदं धनुः ।
सुकुमारः कुमारोसौ कथमारोपयिष्यति ॥१९६॥
इतिचिन्ताकुला कन्या यावच्चित्ते विचारयेत् ।
तावद् द्वादशनन्दीनां निर्घोषः समुपस्थितः ॥१९७॥
भूपानां मञ्चकस्थानां सावधानहृदां पुरः ।
नरो वेत्रधरस्तावदेवमुच्चैरभाषत ॥१९८॥
सर्वे मानवनेतारो दातारोपारविक्रमाः ।
कन्यावरणवाञ्छा चेद्धनुरारोपयन्तु भोः ॥१९९॥
लाटाधिपस्तदोत्तस्थौ कुमारीवरणोत्सुकः ।
ऊर्द्ध्वीकृत्य भुजादण्डं सुसंवृत्योत्तरीयकम् ॥२००॥
समुत्थाय बलं कृत्वा यावद्याति धनुर्दिशम् ।
तावच्चापं च नापश्यज्जन्मान्ध इव भूपतिः ॥२०१॥

जहास परिषत्सर्वा दत्ततालां परस्परम् ।
लज्जाधोवदनो राजा सिंहासनमुपाययौ ॥२०२॥
कर्णाटेशः समुत्थाय कृत्वा भुजपराक्रमम् ।
यावद् गृह्णाति कोदण्डं कन्यावरणलम्पटः ॥२०३॥
तावत्कृतफणाटोपान् दृष्ट्वा सर्पान् भयार्दितः ।
स व्यलोकि सभालोकैः सतालं[1] हसितश्च तैः ॥२०४॥
काश्मीराधिपतिर्वीरो[2]ऽभिमान्यतुलविक्रमः ।
यावद् व्रजेद्धनुःपार्श्वे कनीरूपचमत्कृतः ॥२०५॥
पीडितः पीडया तावत् पतितः पृथिवीतले ।
हसितः पर्षदालोकैर्लज्जितः स्वासने गतः ॥२०६॥
एवमङ्गाधिपो भूपो यावद् गच्छति चाग्रतः ।
देवताधिष्ठितं तावद् दृष्ट्वा ज्वालाकुलं धनुः ॥२०७॥
भीतः सकललोकानां हास्यकोलाहलाकुलः[3] ।
त्रपानतमुखाम्भोजो निविष्टश्च निजासने ॥२०८॥
ततः पद्मरथो राजा चिन्तयामास चेतसि ।
अप्राप्तवाञ्छिता पुत्री कं वरं परिणेष्यति ॥२०९॥
कन्याप्यचिन्तयच्चित्ते नागतः प्राणवल्लभः ।
नूनं स्वयम्वराचारो जातो व्यर्थो ह्यभाग्यतः ॥२१०॥

1 Z सतालः । 2 A ०राभि०, Z ०राः भि० । 3 Z ०कुलं ।

गुप्तवेषधरस्तावद् दृष्टो मित्रयुतः पतिः ।
ततः कन्या सरोमाञ्चा जाता मुदितमानसा ॥२११॥
कुमारश्चित्रसेनोऽपि पश्यन् घनकुतूहलम् ।
खेदखिन्नान् नृपान् सर्वान् वीक्ष्य मित्रान्तिकं गतः ॥२१२॥
गत्वेति कथयामास कुमारः स्फारविक्रमः ।
यदि मित्र तवेच्छा स्याद्धनुरारोपयामि तत् ॥२१३॥
चित्तोत्साहवशेनाहमेवं मन्ये विदाम्वर ।
भविष्यति ममाभीष्टकार्यसिद्धिश्च साम्प्रतम् ॥२१४॥

यतः—

लघूत्थानान्यविघ्नानि सम्भवत्साधनानि च ।
कथयन्ति पुरः सिद्धिं कारणान्येव कर्मणाम् ॥२१५॥

तथा—

दृष्टिपूतं न्यसेत् पादं[1] वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥२१६॥
मनस्येवं विमृश्याथ गत्वा कोदण्डसन्निधौ ।
नमस्कृत्य करे कृत्वा स्मृत्वा चित्ते धनञ्जयम् ॥२१७॥
खड्गपाणिधरं मित्रे निर्भयं पृष्ठतः[2] स्थिते ।
चित्रसेनकुमारेण लीलयारोपितं धनुः ॥२१८॥

1 Z पादं । 2 A Z पृष्टितः ।

आरोपितं धनुर्दृष्ट्वा कुमार्या कुमरम्य च ।
वरमाला गले क्षिप्ता परमानन्दतस्ततः ॥२१९॥
अज्ञातस्य गले पुंसो दृष्ट्वा मालां प्रलम्बिताम् ।
रुष्टाः सर्वेपि भूपालाः सायुधाः समुपस्थिताः ॥२२०॥
अजानन्त्या कुमार्यासौ वृतस्तत्किं सहामहे ।
नीचात्मानं निहत्यैनं ग्रहीष्यामो वयं कनीम् ॥२२१॥
उच्चैरेवं ब्रुवाणास्ते श्मश्रुन्यस्तलसत्कराः ।
कठोरकवचव्रातपरित्रातवपुर्लताः ॥२२२॥
तुरङ्गमगताः केचित् केचिद्दन्तावलस्थिताः ।
शताङ्गसंस्थिताः केचित् सङ्ग्रामाय ढुढौकिरे ॥२२३॥
धनञ्जयाभिधं यक्षं चिन्तयित्वा स्वचेतसि ।
मारोपमः कुमारोपि रणायाभिमुखः स्थितः ॥२२४॥
सङ्ग्रामे दारुणे जाते कुमारेण समन्ततः ।
एकेनापि जिताः सर्वे मृगेशेन मृगा यथा ॥२२५॥
राजा पद्मरथो यावन्निवारयति भूपतीन् ।
अकस्मादाह भट्टश्च कुमारविरुदावलीः ॥२२६॥
श्रीवसन्तपुराधीशवीरसेननृपाङ्गजः ।
कुमारश्चित्रसेनोसौ चिरञ्जयतु भूतले ॥२२७॥
इति कर्णामृतं वाक्यं श्रुत्वा पद्मरथोब्रवीत् ।

स्थीयतां स्थीयतां भूपाः श्रूयतां भट्टवाचिकम् ॥२२८॥
श्रुत्वा तस्य कुलाख्यातिं विस्मिता भूभुजोऽवदन्।
एतच्छौर्यञ्च गाम्भीर्यं नहि क्षत्रकुलं विना ॥२२९॥
अथ सर्वेऽपि राजानः प्रीतास्तं श्रितवत्सलम् ।
सम्यक् क्षामयितुं लग्ना विहिताञ्जलयो नताः ॥२३०॥
ततः पद्मरथो राजा हर्षपूरितमानसः ।
विवाहं कारयामास महता विस्तरेण च ॥२३१॥
करमोचनके दत्तं मणिस्वर्णाम्बरान्वितम् ।
देशाकरपुरग्रामगजवाजिरथादिकम् ॥२३२॥
अथ रत्नपुराधीशो भूपतीन् याचकानपि ।
प्रकामं तोषयामास यदृच्छादानमानतः ॥२३३॥
पाणिग्रहमहे[1] पूर्णे मुदितौ तौ परस्परम् ।
पूर्वजन्मानुरागेण तिष्ठतः ससुखं गृहे ॥२३४॥
तिष्ठतः श्वशुरावासे गते काले कियत्यपि ।
अन्यदा यामिनीशेषे स्मृतं राज्यं निजं हृदि ॥२३५॥
ततो मित्रं समाहूय कथयामास हृद्गतम् ।
श्वशुरस्य गृहं प्रायः पुंसां लज्जाकरं यतः ॥२३६॥
उत्तमाः स्वगुणैः ख्याता मध्यमाश्च पितुर्गुणैः ।

1 Z ०महे ।

अधमा मातुलैः ख्याताः श्वशुरैश्चाधमाधमाः ॥२३७॥
रत्नसारस्ततो गत्वा राज्ञो विज्ञप्तिकां व्यधात् ।
यदाज्ञापयति स्वामी गम्यते स्वगृहं प्रति ॥२३८॥
निर्मिते दर्शने देव मातृपित्रोर्वियोगिनोः ।
वासरा बहवो जाताः प्रसद्याज्ञां प्रयच्छ तत् ॥२३९॥
अथ पद्मरथो राजा श्रुत्वा मन्त्र्युदितं वचः ।
स्वजामातृप्रयाणाय सामग्रीं कृतवांस्ततः ॥२४०
प्रयाणसमये पुत्रीं समारोप्य सुखासने ।
मातृपित्रादिको लोको दत्ते शिक्षामिमां वराम् ॥२४१॥
श्वश्रूश्वशुरशुश्रूषा[1] करणीया निरन्तरम् ।
भर्ता देव इवाराध्यः स्त्रीणां भर्ता हि देवता ॥२४२॥
दत्त्वा शिक्षामिमां पुत्रीं मिलित्वा स्वजनैः समम् ।
कुमारश्चालितो राज्ञा सुतासैन्यसमन्वितः ॥२४३॥
अनेकनगरग्रामान् समुल्लङ्घ्य कियद्दिनैः ।
पश्यन् कुतूहलं मार्गे वनं प्राप्तो मनोरमं ॥२४४॥
न्यग्रोधपादपस्तत्र काननेऽस्ति मनोरमः ।
महाशाखाप्रशाखासत्पत्रराजिविराजितः ॥२४५॥
अथ तस्य तरोः शीतच्छायायां सैनिकाः स्थिताः ।

1 Z ॰शुश्रूषाः ।

मार्गश्रमपरिश्रान्ताः सञ्जाताः सुखिनः समे ॥२४६॥
उपविष्टावधोभागे प्रशंसेते च दम्पती ।
विस्तारशीतलच्छायादिकं पादपसम्भवम् ॥२४७॥
सन्ध्यायामथ जातायां सुप्ताः सर्वेपि सैनिकाः ।
कुमारः सकलत्रोपि सुप्तो मार्गश्रमातुरः ॥२४८॥
रत्नसारः समीपस्थः खड्गव्यग्रकराम्बुजः ।
स्वामिनं सुप्तमालोक्य जातः प्रहरिकस्तदा ॥२४९॥
अधिष्ठाता वटे तत्र गोमुखाह्वानयक्षराट् ।
चक्रेश्वर्या च यक्षिण्या साकं वासमुपस्थितः ॥२५०॥
प्रभूतानीकसंयुक्तं रूपमीनध्वजोपमम् ।
कुमारं सुप्तमालोक्य यक्षमित्याह यक्षिणी ॥२५१॥
कान्त कान्तान्वितः पुण्याधिकः सेनाविभूपितः ।
क एष कुमरः सुप्तः कुत्र वा याति पत्तने ॥२५२॥
ततो ज्ञानोपयोगेन ज्ञात्वा गोमुखयक्षपः ।
वृत्तान्तञ्च कुमारस्य पृष्टः प्राह प्रियां प्रति ॥२५३॥
श्रीवसन्तपुरस्वामि[1]वीरसेननृपात्मजः ।
रत्नमालाङ्गजन्मायं चित्रसेनकुमारकः ॥२५४॥
पित्रापमानितो रत्नसाराभिधसखः स्वयम् ।

1 Z. ०स्वामी ।

गत्वा देशान्तरं पुण्यात् परिणीय नृपात्मजाम् ॥२५५॥
मातृपितृक्रमाम्भोजप्रणामाय प्रयात्यसौ ।
श्रीवसन्तपुरद्रङ्गे भक्तिभावितमानसः ॥२५६॥
कुमारस्य मृता माता कृपावासितमानसा ।
रामान्या भूपतेर्मान्या सञ्जाता विमलाभिधा ॥२५७॥
वशीकृतक्षितीशाया रतीशासक्तचेतसः ।
गुणसेनः सुतस्तस्या जातोऽस्ति गुणमन्दिरम् ॥२५८॥
अनेककैतवेनासौ विप्रतार्य धराधवम्[1] ।
निजपुत्रस्य राज्यार्थमुपायान् कुरुते बहून् ॥२५९॥
यदा यास्यति तत्रासौ कुमारः मारसारदः ।
तातप्रेमभराक्रान्तो विक्रान्तः समराङ्गणे ॥२६०॥
पुत्रारोहकृते लात्वा दोषदुष्टं तुरङ्गमम् ।
वीरसेनधराधीशस्तदायास्यति सन्मुखम् ॥२६१॥
तुरङ्गावलिका पुण्याद्विलयं यदि यास्यति ।
यन्त्रयुक्तप्रतोली द्रागस्योपरि पतिष्यति ॥२६२॥
यदि पूर्वभवाचीर्णपुण्यपुण्यप्रसादतः ।
अपायापगमश्चास्य कुमारस्य भविष्यति ॥२६३॥
विमातृरचिताद्विघ्नो विषमिश्रितमोदकात् ।

1 A धराधरम् ।

भविष्यति तदैतस्य पुण्यात्स यास्यति क्षयम् ॥२६४॥
गुणसेनस्य राज्यार्थं[1] मारणोपायकत्रयम् ।
चिन्तयिष्यति पुत्रस्य विमलाप्रेरितः पिता ॥२६५॥
पुनरस्य कुमारस्य चतुर्थ्यावलिका त्वमौ ।
स्थितस्य वरपल्यङ्के दारुणात् पन्नगाद्भयम ॥२६६॥
रत्नसाराख्यसन्मित्रादावलीनां चतुष्टयम् ।
छुटिष्यति कुमारश्चेत्तदा राजा भविष्यति ॥२६७॥
सखा कृतोपकारश्चेत् कस्यापि कथयिष्यति ।
तदा पादादितः शीघ्रं भविष्यति दृषन्मयः ॥२६८॥
वार्तामाद्यावसानां तां श्रुत्वा मन्त्रीशनन्दनः ।
निधाय मानसं गूढं मित्रकृत्यपरोभवत् ॥२६९॥
प्रभातसमये जाते समुत्थाय नृपात्मजः ।
प्रयाणे प्रगुणीभूय चचाल स्वबलान्वितः ॥२७०॥
अविलम्बप्रयाणेन प्राप्तः स्वपुरसन्निधौ ।
वीरसेननृपस्तावत् समागात् पुत्रसन्मुखः ॥२७१॥
श्रीवसन्तपुरोद्याने मिलित्ते कटके द्वयोः ।
समागते समासन्ने जनके स्वजनान्विते ॥२७२॥
तुरङ्गमात्समुत्तीर्य विचरन् वसुधातले ।

1 Z ०र्थे ।

कुमारः परमानन्दान्ननाम जनकक्रमौ ॥२७३॥
पृष्ट्वा च कृत्रिमप्रेम्णा सुतस्य कुशलादिकम् ।
पुत्राधिरोपणार्थञ्च ददौ दुष्टतुरङ्गमम् ॥२७४॥
चातुर्यान्मन्त्रिपुत्रेण सदृशोन्यस्तुरङ्गमः[1] ।
सञ्चारितश्च[2] तत्कालं न ज्ञातं केनचित् पुनः ॥२७५॥
वाद्यमानेषु वाद्येषु वर्द्धापनपुरस्सरम् ।
जयमुच्चरत्सु भट्टेषु गीतगानमनोरमम् ॥२७६॥
यावत् प्रतोलीमायातः महेन महताथ सः ।
तावदागत्य मित्रेण तुरङ्गो वदने हतः ॥२७७॥
पश्चात्पादैर्मनागेष चचाल वसुधातले ।
प्रतोली सहसा तावत् पतिता सा जनोपरि ॥२७८॥
लोके हाहारवो जातो विलक्षोभून्महीपतिः ।
कुमारो मन्त्रिपुत्रेण रक्षितो मृत्युसङ्कटात् ॥२७९॥
अथ विस्मयचित्तोसौ वीरसेननरेश्वरः ।
आनयन्नन्दनं गेहे प्रीतस्तद्विनयादिना ॥२८०॥
कुमारश्चित्रसेनाख्यः संप्राप्तः सदने निजे ।
उपमातुः पदद्वन्द्वं ननाम प्रीतमानसः ॥२८१॥
मातस्ते कुशलं देहे पुत्रे च कुशलं तव ।

1 A तत्समोऽन्य०; Z ०न्यतु० । 2 A संचारि[त]श्च ।

कुशलं तव गेहे च पप्रच्छैवं स भक्तितः ॥२८२॥
तथापि दुष्टचित्ता सा चेतसीति व्यचिन्तयत् ।
विषमोदकदानेन मारयिष्याम्यमुं पुनः ॥२८३॥
निश्चित्येति स्वचित्ते सा चित्रसेनं न्यवेदयत् ।
भोजनं कुरु मे गेहे कुमार स्फारविक्रम ॥२८४॥
कुमारश्चित्रसेनस्तां प्रत्यवोचत्ततो मुदा ।
मातृहस्तस्य पुण्येन भोजनं लभ्यते यतः ॥२८५॥
दानमात्मीयहस्तेन मातृहस्तेन भोजनम् ।
तिलकं विप्रहस्तेन परहस्तेन मर्दनम् ॥२८६॥
ततः सकलसामग्रीं भोजनस्य विधाय च ।
कुमारो मित्रसंयुक्तो भोजनाय निमन्त्रितः ॥२८७॥
भोजनावसरे जाते कुमाराकारणे कृते ।
समोदकेन मित्रेण सहागात् सपरिच्छदः ॥२८८॥
ततो भोजनशालायां मण्डितेष्वासनेषु च ।
राजा[1] राजसुताद्यास्ते उपविष्टा यथाक्रमम् ॥२८९॥
स्थालादीनि विशालानि मण्डयित्वा तदग्रतः ।
परिवेषणवेलायां भोज्यान्यानीय भूरिशः ॥२९०॥
व्यञ्जनानि त्वनेकानि मुक्तानि प्रथमं ततः ।

1 A राजराजसुता० ।

भाजने वीरसेनस्य मुक्ताः सुन्दरमोदकाः ॥२९१॥
कुमारे सह मित्रेणोपविष्टेप्येकभाजने ।
कुमारभाजने मुक्तौ मोदकौ तु तथा पुनः ॥२९२॥
मोदकौ दृष्टमात्रौ तु हस्तलाघवविद्यया ।
गृहीतौ मन्त्रिपुत्रेण परौ मुक्तौ स्वपार्श्वतः ॥२९३॥
मोदकानन्तरं शालिमुद्गदालिमनोहरम् ।
सद्यस्कघृतसंयुक्तं स्फुरद्दध्यादिगोरसम् ॥२९४॥
जनकेन समं भुक्त्वा शुचीभूय समुत्थितः ।
चित्रसेनकुमारोसौ मानसे मुमुदे भृशम् ॥२९५॥
ततश्च तिलकं कृत्वा दत्वा ताम्बूलमुत्तमम् ।
परिधाप्याम्बरालङ्कारादिकं प्रेषितो गृहे ॥२९६॥
पद्मावती स्नुषा स्फूर्जदलङ्कारम्बरादिना ।
श्वश्रूसन्मानिता कामं समायाता निजे गृहे ॥२९७॥
देवानुकूल्यतः पुंसामथवा पुण्ययोगतः ।
सुधायते विषं सर्पः पुष्पमालायते रयात् ॥२९८॥
यद्यप्यस्ति धराधीशो विमलाविप्रतारितः ।
तथापि चित्रसेने च वात्सल्यप्रेमतत्परः ॥२९९॥
कियत्यपि दिने राजाचिन्तयन्नञ्जमञ्जसा ।
अङ्गजे मारणोपायमचिन्तयमहं हहा ॥३००॥

पौरुषं धिगिदं मे हि धिग् बुद्धिं विभुतां च धिक् ।
पुत्ररत्ने मया येन चिन्तितं मारणं हहा ॥३०१॥
इति वैराग्यरङ्गेण यावत्तिष्ठति रङ्गितः ।
तावच्चरमतीर्थेशो विहरंस्तत्र चागतः ॥३०२॥
समवसरणं चक्रे प्रदेशे रमणीयके ।
चतुर्विधसुरैः सद्यो दुर्गत्रयविराजितम् ॥३०३॥
चतुर्द्वारस्थितोदारचतुर्वापीमनोरमे ।
उपविष्टो जिनाधीशस्तत्राशोकतरोस्तले ॥३०४॥
अर्हन्तमागतं ज्ञात्वा राजागात् सपरिच्छदः ।
तं त्रिः प्रदक्षिणीकृत्य नत्वाग्रे समुपाविशत् ॥३०५॥
भवपाथोधिनिस्तारकारकं पापवारकम् ।
उपदेशं जिनेशस्य शुश्राव श्रावकोत्तमः ॥३०६॥

यथा—

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥३०७॥
कल्लोलचपला लक्ष्मीः सङ्गमाः स्वप्नसन्निभाः ।
वात्याव्यतिकरोत्क्षिप्ततूलतुल्यं तु यौवनम् ॥३०८॥
व्याकुलेनापि चित्तेन धर्मः कार्योऽन्तरान्तरा ।
मेढीबद्धोऽपि हि भ्राम्यन् घासग्रासं करोति गौः ॥३०९॥

सम्पत्तौ नियमः शक्तौ सहनं यौवने व्रतम् ।
दारिद्र्ये दानमत्यल्पं महालाभाय जायते ॥३१०॥
मायं व परकलत्तं जो मन्नइ कंचणं कयारसमं ।
जीवेसु य कुणइ दयं सो पुरिसो जंगमं तित्थं ॥३११॥
उपदेशमिति श्रुत्वा राजा राज्यधनादिषु ।
रागं मुमोच वैराग्याज्जलात् कौसुम्भवस्त्रवत् ॥३१२॥
वीरसेनो गृहे गत्वा पृष्ट्वामात्यं शुभे दिने ।
चित्रसेनाभिधं पुत्रं निजराज्ये[1] न्यवेशयत् ॥३१३॥
शृण्वन्तु मद्वचो भूपाः सर्वे मन्त्रीश्वरास्तथा ।
स्थापितोस्ति सुतो राज्ये माननीयो हि मत्समः ॥३१४॥
त्यक्तमोहस्ततो राजा मुत्कलापयति प्रियाम् ।
भव्यरीत्या त्वया स्थेयं दीक्षायां वयमुत्सुकाः ॥३१५॥
इति राज्ञो वचः श्रुत्वा प्रियाप्येनं व्यजिज्ञपत् ।
त्वां विना प्राणनाथाहं कथं प्राणान् धराम्यमून् ॥३१६॥
शृङ्गाराः सुन्दरास्तावत् तावद्राज्यं सुखप्रदम् ।
क्षीणा भोगा वरास्तावद् यावद् भर्ता हि सन्निधौ ॥३१७॥
वीरसेनस्ततोवादीत्तावकीनः सुतोप्ययम् ।
लाल्यमानस्तवात्यन्तं भविष्यति सुखप्रदः ॥३१८॥

1 A निजे ।

ततः प्राह धराधीशं राज्ञी सम्वेगसङ्गता ।
कस्यैते नन्दनाः कस्य सम्पदः कस्य चालयाः ॥३१९॥
त्यक्त्वा राज्यश्रियं कोशं तथा सैन्यं चतुर्विधम् ।
देशाकरपुरग्रामान् दत्त्वा दानञ्च भूरिशः ॥३२०॥
वैराग्यरञ्जितो राजा प्रियाचारः प्रियान्वितः ।
वर्द्धमानजिनाधीशपार्श्वे जग्राह स व्रतम् ॥३२१॥
पालयन् चरमाचारं समधीतबहुश्रुतः ।
विजहार धरापीठे भव्यजीवान् प्रबोधयन् ॥३२२॥
तेजसा तेजसामीशः सोमः सौमतया तथा ।
चित्रसेनधराधीशः पितेवापालयत् प्रजाः ॥३२३॥
प्रज्ञाजितसुराचार्यो मन्त्रिपञ्चशतोत्तमः ।
रत्नसाराभिधस्तस्य मान्यो मन्त्रीश्वरोभवत् ॥३२४॥
अन्यदा रत्नसाराख्यश्चिन्तां चित्तेकरोन्निशि ।
आवलीप्रयमेतस्य पुण्यतो विलयं गतम् ॥३२५॥
वरं पुण्यं कृतं यत्नात् परत्रात्रफलप्रदम् ।
विमृश्येति नरेशाग्रेवोचत् सत्यमिदं वचः ॥३२६॥
प्राज्यं राज्यं तथारोग्यं भाग्यं सौभाग्यभासुरम् ।
रामा रूपाभिरामा च भवेत् पुण्यप्रभावतः ॥३२७॥
तत्पुण्यमधुना राजन् कुरु सर्वज्ञभाषितम् ।

सर्वपापहरं[1] सम्पत्करं दुःखविदारकम् ॥३२८॥
इति मन्त्रिवचः श्रुत्वा पुण्यप्रवणमानसः ।
जीर्णोद्धारान् विनिर्माति दीनोद्धरणकर्मठः ॥३२९॥
अमारिपटहोद्घोषं स्वदेशेकारयन्नृपः ।
पोषं साधर्मिकाणाञ्च जिनार्चां कुरुते सदा ॥३३०॥
एवं विश्वम्भराधीशः प्रियया प्रिययान्वितः ।
रत्नसारसखः सारं पुण्यं पुष्णाति नित्यशः ॥३३१॥
आसने गमने पाने भोजने जिनपूजने ।
शयनेपि समासन्नास्तिष्ठन्त्येते त्रयोपि हि ॥३३२॥
करवालस्फुरत्पाणिः[2] स्वामिभक्तिपरायणः ।
रत्नसारो महामात्यो नित्यं प्राहरिकोभवत् ॥३३३॥
तेषां श्रेयांसि भूयांसि प्रमोदात् कुर्वतां सताम् ।
भुञ्जानानां वरान् भोगान् गते काले कियत्यपि ॥३३४॥
अथान्येद्युर्विभावर्यां सनिद्रं सुप्तयोस्तयोः ।
श्यामलः पन्नगोदर्शि पल्यङ्कोपरि मन्त्रिणा ॥३३५॥
यक्षोक्तं वचनं स्मृत्वा खड्गमादाय वेगतः ।
पातितस्तेन घातेन भूमौ घोरो भुजङ्गमः ॥३३६॥
राज्ञ्या जङ्घाप्रदेशे च पतितं सर्पशोणितम् ।

1 Z सर्व । 2 Z ०स्फुरत्पाणिस्वामि० ।

वस्त्राञ्चलेन मन्त्रीशो भीतो बिन्दुमपाकरोत् ॥३३७॥
प्रबुद्धोथ धराधीशः किमेतदिति वेगतः ।
रत्नसाराभिधं मित्रमपृच्छद्विस्मयाकुलः ॥३३८॥
रत्नसारस्ततो मन्त्री कम्पमानवपुर्लतः ।
पतितः सङ्कटे काममितो व्याघ्र इतस्तटी ॥३३९॥
यदि वच्मि यथातथ्यं भवाम्यश्ममयस्तदा ।
अलीकवचने प्रोक्ते नृपोन्यच्चिन्तयिष्यति ॥३४०॥
उपकारैर्न गृह्यन्ते सेवया न च पौरुषैः ।
दुर्जना इव राजानो नात्मीया हि कथञ्चन ॥३४१॥
रत्नसारस्ततोमात्यश्चेतसीति व्यचिन्तयत् ।
स्वामिनोग्रे मृषाभाषां[1] न ब्रवीति बुधो यतः ॥३४२॥
सत्यं मित्रे प्रियं स्त्रीभिरलीकमधुरं द्विषाम् ।
अनुकूलञ्च सत्यञ्च वक्तव्यं स्वामिना सह ॥३४३॥[2]
एनां वार्तामहं स्वामिन् कथयामि यदा तव ।
तदा दृषन्मयः शीघ्रं भविष्यामि न संशयः ॥३४४॥
जगाद जगतीपालस्तदा विस्मितमानसः ।
कथं वचनमात्रेण पाषाणत्वं[3] प्रजायते ॥३४५॥

1 A Z मृषां । 2 Z omits this verse by oversight.
3 A Z पाखाणत्वं ।

एतद्वचनमाकर्ण्य रत्नसारः कलानिधिः ।
साहसञ्च समालम्ब्य बभाषे यक्षभाषितम् ॥३४६॥
परिणीय प्रियामेतामागच्छन्तोत्र पत्तने ।
स्थिता वटतरोर्मूले जानन्ति स्वामिनः स्वयम् ॥३४७॥
पुरा दुष्टतुरङ्गोत्थावलिका विनिवारिता ।
न ज्ञाता स्वामिनान्येन मानवेनापि केनचित् ॥३४८॥
कथितं वचनं यावद् भूपतेस्तेन मन्त्रिणा ।
सञ्जातो जानुमात्रस्तु सद्यो मन्त्री दृषन्मयः ॥३४९॥
चित्रसेनावनीशेनाग्रतो जल्पेति भाषितः ।
मन्त्रिराजः समाचष्टे द्वितीयावलिकामपि ॥३५०॥
त्वयि प्रतोलीमायाते यावदश्वो हतो मुखे ।
घातितश्च ययौ पश्चात् प्रतोली तावदापतत् ॥३५१॥
तद्वचःकथनाज्जातः कटीं यावद् दृषन्मयः ।
पुनर्भूमिभुजाभाणि जातं किं हु तदग्रतः ॥३५२॥
शृणु राजन् जनन्या ते मोदकौ परिवेषितौ ।
परावृत्यापरौ मुक्तौ मयाज्ञायि न तत्त्वया ॥३५३॥
तृतीयावालिकावादि यावन्मित्रेण रंहसा ।
तावदश्ममयो जातः कण्ठं यावत्स मन्त्रिराट् ॥३५४॥
वृत्तान्तत्रितयं ज्ञात्वा पुनः पृष्टो महीभुजा ।

मन्त्रीशः कथयामास चतुर्थीवलिकामपि ॥३५५॥
दोलापर्यङ्कके सुप्ते सकलत्रे त्वयि प्रभो ।
भुजङ्गमो मया दृष्टः शृङ्खलातः समुत्तरन् ॥३५६॥
मयासौ घातितः सद्यः पतितं तस्य शोणितम् ।
राज्ञीजङ्घोपरिष्टाच्च भीत्या वस्त्रेण मार्जितम् ॥३५७॥
चित्रसेन नराधीश पुण्यपुण्यप्रभावतः ।
एतत्ते विलयं प्राप यक्षोक्तापच्चतुष्टयम् ॥३५८॥
इत्युक्ते सहसा मन्त्री जातः पाषाणसन्निभः ।
पतितः पृथिवीपीठे देववाचा हि नान्यथा ॥३५९॥
मित्रस्यापदमालोक्य राजा दुःखेन दुःखितः ।
स्मरन् सारगुणव्रातं मूर्छया न्यपतद्भुवि ॥३६०॥
ततः शीतोपचारेण सुस्थीभूतो नरेश्वरः ।
हा भ्रातः प्रिय मित्रेति प्रजल्पन् विललाप सः ॥३६१॥
विदेशभ्रमणे दक्षं मित्रार्थकरणक्षमम् ।
दुष्प्रापं नररत्नं हा मया मूढेन हारितम् ॥३६२॥
जानतापि मया हा धिगनर्थोयं स्वयं कृतः ।
भवितव्यानुसारेण बुद्धिः पुंसां हि जायते ॥३६३॥

यतः—

तादृशी जायते बुद्धिर्व्यवसायाश्च तादृशाः ।

सहायास्तादृशा ज्ञेया यादृशी भवितव्यता ॥३६४॥
मित्रं[1] विना वृथा राज्यं वृथा देशो वृथा सुखम् ।
वृथा कोशो वृथा सैन्यं किं पुनर्जीवितं वृथा ॥३६५॥
तद्वियोगातुरो नूनं प्राणत्यागं करोम्यहम् ।
इष्टबन्धुवियुक्तानां नान्यद् दुःखनिवारणम् ॥३६६॥
विचिन्त्येति निजे चित्ते चित्रसेनो नराधिपः ।
मरणाय समुत्तस्थौ यावच्चिन्ताभराकुलः ॥३६७॥
ज्ञात्वा तावदभिप्रायं चित्ते राज्ञीत्यचिन्तयत् ।
असमञ्जसमुत्पन्नं राज्यक्षयनिबन्धनम् ॥३६८॥
आत्महानिश्च सर्वेषु लोकेषु वचनीयता ।
येन केनाप्युपायेन क्रियते काललङ्घनम् ॥३६९॥
राज्ञी हृदि विमृश्येति बभाषे भूपतिं प्रति ।
नाथ कातरता त्याज्यालम्बनीया हि धीरता ॥३७०॥
प्रिय दुःखे समुत्पन्ने मृत्युमिच्छन्ति कातराः ।
विवेकिनः पुनर्धीराः पुण्यं कुर्वन्ति भूरिशः ॥३७१॥
वल्लभैक उपायोऽस्ति करोषि मद्वचो यदि ।
दातव्यं दानशालायामर्थिनां दानमीहितम् ॥३७२॥
तेन लुब्धाः समेष्यन्ति देशदेशान्तरस्थिताः ।

1 Z मंत्रि ।

रक्ताम्बर[1]जटाधारियोगिसंन्यासिनोपि हि ॥३७३॥
कलावन्तः परिव्राजो निमित्तज्ञाश्च लिङ्गिनः ।
तन्त्रयन्त्रकमन्त्रज्ञा आगमिष्यन्त्यनेकशः ॥३७४॥
कोपि जीवापयेदेनं मन्त्रादिक्रियया यदि ।
आवयोश्च तदा पुण्यात् संसिद्ध्यन्ति मनोरथाः ॥३७५॥
इयं क्रिया प्रियाप्रोक्ता कृता भूपेन रंहसा ।
वैदेशिकान् समायातान् प्रीणितान् दानमानतः ॥३७६॥
पृच्छति स्म प्रतीकारं मित्रदुःखनिवारकम् ।
कथितं यद्यथा येन कृतं भूपेन तत्तथा ॥३७७॥
कष्टं न याति मित्रस्य प्रतीकारे कृतेपि हि ।
निराशो वसुधाधीशः पुनश्चिन्तातुरोभवत् ॥३७८॥
भोगाभोगसभागीतनृत्यादिकपराङ्मुखः ।
मित्रस्य चिन्तया राजा राज्यचिन्तां च नाकरोत् ॥३७९॥
अन्यदा भूपतिश्चित्ते रजन्यामित्यचिन्तयत् ।
आवली कथिता येन यक्षेशेन महात्मना ॥३८०॥
स हि मित्रप्रतीकारं कथयिष्यति निश्चितम् ।
विचारयन् मनस्येवं व्यतीयाय निशामसौ ॥३८१॥
जाते सूर्योदये राजा जीर्णमन्त्रीश्वरस्य च ।

1 A ०म्बरा ज० ।

राज्यभारं समारोप्य प्रयाणप्रगुणोऽभवत् ॥३८२॥
मुत्कलाप्य प्रियां स्वीयां खड्गमादाय निर्भयः[1] ।
चित्रसेननराधीशश्चलितः शुभवासरे ॥३८३॥
कियद्भिर्वासरैर्भूमिप्रभुः प्राप्य वटद्रुमम् ।
मित्रचिन्तातुरस्वान्तः सुप्तस्तत्र तरोस्तले ॥३८४॥
मित्रदुःखाकुलः कामं मीनः स्तोक इवोदके ।
यक्षेशयक्षिणीभ्यां स सुप्तस्तत्र विलोकितः ॥३८५॥
यक्षिणी कथयामास कृपावासितमानसा ।
स्वामिन्नेष पुमान् कोऽसौ केन दुःखेन दुःखितः ॥३८६॥
यक्षोऽवोचत् प्रिये मर्त्यमेनं जानासि नो किमु ।
सकलत्रः समित्रोऽसौ ससैन्योऽत्र स्थितः पुरा ॥३८७॥
एतद्वचनमाकर्ण्य परदुःखेन दुःखिता ।
पप्रच्छ यक्षिणी यक्षं दुःखितोऽसौ कथं विभो ॥३८८॥
यक्षोऽवादीत् कुमारोऽसौ गुणानामेकमन्दिरम् ।
इष्टमित्रवियोगार्त्तो भ्रमत्येको धरातले ॥३८९॥
यक्षिणी प्राह हे स्वामिन् वियुक्तोऽसौ कथं ततः ।
बभाषे यक्षराजोऽपि भद्रे त्वं कारणं शृणु ॥३९०॥
तवाग्रे यन्मया पूर्वमवाच्यापच्चतुष्टयम् ।

1 Z निर्भयं ।

स्फेटितं तत् कुमारस्य मन्त्रिपुत्रेण पुण्यतः ॥३६१॥
निराकृतावलीश्चेत्स्म कस्यापि कथयिष्यति ।
तदा दृषन्मयीभूय पतिष्यत्ययवनीतले ॥३६२॥
रत्नसाराभिधः स्निग्धः स्फेटितापच्चतुष्टयम् ।
निरूप्य तत् कुमाराग्रे जातः पाषाणसन्निभः ॥३६३॥
तद्वियोगातुरश्चैष' बम्भ्रमीत्यभितो यतः ।
स्नेहो दुःखतरोर्मूलं स्नेहोनर्थपरम्परा ॥३६४॥
दयार्द्रहृदयावोचद् यक्षस्याग्रे च यक्षिणी ।
एतन्मित्रप्रतीकारो विद्यते वद न वा विभो ॥३६५॥
विमृश्य हृदये यक्षराजः प्राह प्रियां प्रति ।
अस्य रोगप्रतीकारं कथयामि प्रिये शृणु ॥३६६॥
कापि स्त्री शीलसम्पन्नोत्सङ्गस्थाङ्गजसंयुता ।
सर्वाङ्गं चेत्स्पृशेदस्य नीरोगस्तत्क्षणाद् भवेत् ॥३६७॥
चित्रसेनो नृपो वार्तामाकर्ण्यामूलचूलतः ।
निर्धार्य हृदये बाढं सुप्तो निर्भरनिद्रया ॥३६८॥
यक्षोक्तं वचनं श्रुत्वा धृत्वानन्दं हृदन्तरं ।
कुमारः प्रातरुत्थाय चलितः स्वपुरं प्रति ॥३६९॥
अविलम्बप्रयाणेन भूपतिर्मुदिताशयः ।

1 Z ० श्चैव ।

क्रियद्भिर्दिवसैः प्राप वसन्तपुरपत्तनम् ॥४००॥
हर्षिताश्च प्रजाः सर्वा भूमिवल्लभदर्शनात् ।
पद्मावती प्रियं दृष्ट्वा जाता प्रेमपरायणा ॥४०१॥
आसन्नप्रसवां राज्ञीं तस्मिन्नवसरेऽनघः ।
समालोक्य सुखं प्राप चित्रसेननरेश्वरः ॥४०२॥
वाञ्छितार्थाश्च सिद्धा मे नूनं पुण्यप्रभावतः ।
इति ध्यात्वा निजं राज्यं पालयामास भूपतिः ॥४०३॥
चित्रसेननराधीशः परोपकृतिकर्मठः ।
धर्मध्यानमनाः कामं गमयामास वासरान् ॥४०४॥
शुभे दिने शुभे लग्ने शुभस्थानगतग्रहे ।
मुदा पद्मावती राज्ञी सुतरत्नमजीजनत् ॥४०५॥
महानन्दान्महीपालः पुत्रजन्ममहोत्सवे ।
पूजां सर्वत्र चैत्येषु चकार दिवसाष्टकम् ॥४०६॥
अमारिपटहोद्घोषं पोषं सर्वजनस्य च ।
दीनोद्धारादिकं पुण्यं कारयामास भूपतिः ॥४०७॥
इत्युत्सवभराज्जातेष्वेकादशदिनेष्वथ ।
भूपतिर्बहुमानेनाभोजयत् स्वजनान् बहून् ॥४०८॥
भोजनानन्तरं सर्वे मिलिता राजमन्दिरे ।
सन्मानदानतस्तुष्टा नामस्थापनसत्क्षणे ॥४०९॥

राज्ञोवे मत्कुले पुत्रो जातः पुण्यप्रभावतः ।
ततस्तदनुमानेन धर्मसेनाभिधास्य च ॥४१०॥
तैरेव स्वजनैः सार्द्धं पद्मावत्या समन्वितः ।
वाद्यमानेषु वाद्येषु दानशालां गतो नृपः ॥४११॥
रत्नसारं समुत्पाद्य स्मृत्वा यक्षवचो हृदि ।
यथोक्तविधिना तस्य स्नानपूजादिकं व्यधात् ॥४१२॥
ततः पद्मावती राज्ञी निजोत्सङ्गस्थिताङ्गजा ।
परमेष्ठ्यभिधं मन्त्रं संस्मृत्येति वचोब्रवीत् ।४१३॥
शृण्वन्तु लोकपाला भोः सूर्यचन्द्रग्रहादयः ।
क्षेत्रपालाश्च वेतालाः सर्वे वैमानिकास्तथा ॥४१४॥
मनसा वपुषा वाचा शीलं चेन्मेस्ति निर्मलम् ।
तदा हि मत्करस्पर्शात् सज्जीभवतु मन्त्रिसूः ॥४१५॥
इत्युक्त्वा स्वकरस्पृष्टमात्रेणोत्पन्नचेतनः ।
तत्क्षणादुपविष्टोभूद् यथा सुप्तोत्थितो नरः ॥४१६॥
चित्रसेनस्ततो राजा रत्नसारसमन्वितः ।
स्वराज्यं पालयामास धर्मकर्मपरायणः ॥४१७॥
मन्त्रिपद्मावतीयुक्तश्चित्रसेननराधिपः ।
ज्ञात्वा पुण्यफलं जातो विशेषाद्धर्मतत्परः ॥४१८॥
शिष्टानां पालने धीमानशिष्टानामपालने ।

कीर्तिं विस्तारयामास दानशीलादिपुण्यतः ॥४१९॥
अन्येद्युस्तं सभासीनं मन्त्रिसामन्तशोभितम् ।
नरः कोपि समागत्य विज्ञापयति भूपतिम् ॥४२०॥
देव सिंहपुरस्वामी वर्तते सिंहशेखरः ।
गर्वितो भूरिसैन्येन भवत्सीमविनाशकृत् ॥४२१॥
विधत्ते मार्गविध्वंसं मुष्णाति पथिकान् बहून् ।
न सेवां कुरुते दण्डं न ददाति कदाप्यसौ ॥४२२॥
सापराधमिति श्रुत्वा भूपो दूतमुखात्ततः ।
दुन्दुभिं दापयामास कोपाटोपारुणेक्षणः ॥४२३॥
समर्प्य कवचानेकशस्त्रालीतुरगादिकम् ।
सारसत्कारतः सज्जीचकार सुभटान् नृपः ॥४२४॥
चतुरङ्गचमूयुक्तश्चित्रसेननरेश्वरः ।
वाद्यमानस्फुरद्वाद्यश्चचाल स्वपुरात्ततः ॥४२५॥
अतुच्छमत्सराक्रान्तः कियद्भिर्वासरैस्ततः ।
भूपतिर्दण्डकारण्ये सम्प्राप भयभीषणे ॥४२६॥
निशीथसमये जाते सुप्तेषु सैनिकेष्वथ ।
अकस्मात्क्रन्दनारावं श्रुत्वा राजा व्यचिन्तयत् ॥४२७॥
अस्यां निर्मानुषाटव्यां श्रूयते क्रन्दनं किमु ।
विमृश्येति निजे चित्ते खड्गपाणिर्नृपोचलत् ॥४२८॥

आक्रन्दनानुसारेण गतो यावत्कियद्भुवम् ।
तावत्तरोरधोभागेपश्यत् कमपि पूरुषम्[1] ॥४२६॥
बद्धं निगडबन्धेन कीलितं लोहकीलकैः ।
दिव्यरूपधरं दिव्यवेषालङ्कारसुन्दरम् ॥४३०॥
चित्रसेननराधीशः पप्रच्छेति नरं प्रति ।
कस्त्वं कस्य सुतः कास्यावस्था ते कथमीदृशी ॥४३१॥
ततः स पुरुषः प्राह पीडया पीडितोपि सन् ।
ममाश्चर्यंकरीं वार्त्तां शृणु वीरशिरोमणे ॥४३२॥
बन्धनाच्छोटय त्वं मां कीलकांश्च निराकुरु ।
कथयामि स्ववृत्तान्तं निःशल्यः सन् भवत्पुरः ॥४३३॥
तथा कृते नरः प्राह वैताढ्याभिधपर्वते ।
उत्तरश्रेणिशृङ्गारं नाम्ना हेमपुरं पुरम् ॥४३४॥
तत्रास्ति विश्वविख्यातो विद्याधरशिरोमणिः ।
दानादिगुणसम्पूर्णो राजा हेमरथाभिधः ॥४३५॥
तत्प्रिया हेममालास्ति हेममालेव निर्मला ।
तत्कुक्षिसम्भवो नाम्ना हेममालीत्यहं सुतः ॥४३६॥
हेमचूलाप्रियायुक्तः स्थितः सुन्दरमन्दिरे ।
सारसंसारसौख्यानि विलसामि यथारुचि ॥४३७॥

1 A पुरु० ।

अन्यदा सकलत्रस्य सञ्जातः सुखितस्य मे ।
नन्दीश्वरवरद्वीपतीर्थयात्रामनोरथः ॥४३८॥
मनोरमविमानस्थः प्रियया प्रिययान्वितः ।
तीर्थानि प्रणमन् मार्गे यावदत्र समागतः ॥४३९॥
मत्पृष्ठतः समायातो मत्प्रियालुब्धमानसः ।
रत्नचूडाभिधो दुष्टविद्याधरभटैर्वृतः ॥४४०॥
निष्कृपः किल पापात्मा विधाय मम बन्धनम् ।
मद्वल्लभां समादाय जगाम निजधाम सः ॥४४१॥
हेममालिवचः श्रुत्वा उपकारपरात्मना ।
व्रणसंरोहिणीलेपात् सज्जाङ्गः सहसा कृतः ॥४४२॥
राज्ञश्चरणामानम्य हेममाली व्यजिज्ञपत् ।
मोचितोहं यथा देव तथा वालय मत्प्रियाम् ॥४४३॥
भूपस्तद्वचनं श्रुत्वा परोपकृतितत्परः ।
तेन सार्द्धं विमानस्थश्चचालाचलविक्रमः ॥४४४॥
भूपतिः कियतीं भूमिं यावद् गच्छति चाग्रतः ।
स्थितस्तरुतले तावद् दृष्टः पापमना रिपुः ॥४४५॥
पारदारिक पापात्मन् क्व गमिष्यसि साम्प्रतम् ।
चित्रसेननरेशेन हक्कितश्चेति कम्पितः ॥४४६॥
आकस्मिकवचः श्रुत्वा सर्वे भीताः पलायिताः ।

एकाकी स स्थितश्चौरः सङ्ग्रामाय समुद्यतः ॥४४७॥
क्लीवत्रासकरे युद्धे सञ्जाते च परस्परम् ।
चित्रसेनधरेशेन निर्जितः पारदारिकः ॥४४८॥
स मृत्युभयभीतः सन् समादाय मुखे तृणम् ।
पतित्वा भूपतेः पादौ पुनरेवं व्यजिज्ञपत् ॥४४९॥
नेतः कान्तिपुरेशस्य रत्नचूडाभिधः सुतः ।
विद्यां साधयितुं शैले गतोहं गन्धमादने ॥४५०॥
विद्यायाः साधनं कृत्वा परिवारपरावृतः ।
पश्यन् विश्वम्भराश्चर्यमभ्रमं च यदृच्छया ॥४५१॥
हेममाली प्रियायुक्तो मिलितो मम सन्मुखम् ।
विलोक्य तद्वधूरूपं जातोहं कामपीडितः ॥४५२॥
मामन्यायमतिं मुक्त्वा विद्याधिष्ठायिका गता ।
ततो विगतविद्योहं जातो विह्वलमानसः ॥४५३॥
समीक्ष्य तदवस्थं मां हसितं मित्रमण्डलम् ।
विलोक्य कौतुकं कामं हास्यं कस्य न जायते ॥४५४॥
अट्टट्टहासमाकर्ण्य कुपितो हेममाल्यसौ ।
विरूपवचनैर्गालिं ददानो न निवर्तते ॥४५५॥
ततः कोपान्मया देव बन्धितः कीलितोप्यसौ ।
तत्कान्तां च समादाय स्थितोहं काननान्तरे ॥४५६॥

विनोदेन मया पृष्टा कासि त्वं कस्य वा सुता ।
ततः श्रुते समाचारे ज्ञातासौ गोत्रकन्यका ॥४५७॥
तावत्त्वदीयहक्काभिर्वयस्याः कातरा मम ।
कांदिशीका[1] द्रुतं नष्टाः सिंहनादादिव द्विपाः ॥४५८॥
मया शीलव्रतं पूर्वं गृहीतं गुरुसन्निधौ ।
अन्यथा कामिनः केपि पृच्छन्ति किं कुलादिकम् ॥४५९॥
रत्नचूडवचः श्रुत्वा चित्रसेननराधिपः ।
प्रशंसां कुरुते तस्य वारं वारं गुणादरः ॥४६०॥
उपकारपरा धन्या दीनोद्धारपरास्तथा ।
परकार्यकरा धन्या धन्याः शीलधरा नराः ॥४६१॥
हेममाली नमस्कृत्य राज्ञश्चरणपङ्कजम् ।
इति विज्ञापयामास विनयानतमस्तकः ॥४६२॥
जीवदानं धराधीश न दत्तं मम केवलम् ।
कुलं हेमरथस्यापि ब्रुडद्यांद्धृतं त्वया ॥४६३॥
सद्यः प्रसादमाधाय देव मामनृणीकुरु ।
रत्नद्वयञ्च मत्पार्श्वाद् गृहाणाश्रितवत्सल ॥४६४॥
अनेकतीर्थयात्रार्थं नराधीश नभस्तले ।
पल्यङ्केन यथाकामगामिना गम्यतेभितः ॥४६५॥

1 Z काद्रिशीका ।

संहारप्रेरिते दण्डे भवेत् संहारकारणम् ।
सृष्टिसञ्चारिते तस्मिन् सञ्जीवेत् सकलं पुनः ॥४६६॥
मनोभिगामिपल्यङ्कं दण्डं शत्रुजयाभिधम् ।
इति रत्नद्वयं देव गृहाणानुगृहाण माम् ॥४६७॥
इत्युक्त्वा वसुधानेतुर्विद्याधरशिरोमणिः ।
हेममाली ददौ भक्त्या स रत्नद्वयमुत्तमम् ॥४६८॥
पल्यङ्कं रत्नदण्डञ्च समादाय धराधवः ।
हेममालिगुणोच्चारं विदधाति पुनः पुनः ॥४६९॥
रत्नचूडः समुत्थाय प्राञ्जलिर्न्यवदन्नृपम् ।
नाथ रूपपरावर्तगुटिकां त्वं गृहाण मे ॥४७०॥
गुटिकामर्पितां लात्वा तयोराकाशचारिणोः ।
विरोधञ्च निराकृत्य सन्तोषं नृपतिर्व्यधात् ॥४७१॥
प्रभातसमये जाते द्वावपि व्योमचारिणौ ।
प्रीतिपूर्वं स संमान्य प्रैषीन्निजपुरं प्रति ॥४७२॥
नृपः सैन्ये समायातो विबोध्याशु स्वसैनिकान् ।
चतुरङ्गचमूयुक्तो यावद् गच्छति चाग्रतः ॥४७३॥
तावत्सिंहपुराधीशप्रेषितो दूत आगतः ।
नत्वा[1] विश्वम्भराधीशमवादीत् स्वामिनोदितम् ॥४७४॥

1 Z तथा instead of नत्वा ।

विज्ञापयति मद्वक्त्रान् मत्स्वामी रत्नशेखरः ।
नात्रागन्तव्यमुर्वीश स्वश्रेयो यदि वाञ्छसि ॥४७५॥
इति दूतवचः श्रुत्वा कुपितो मेदिनीपतिः ।
अवध्यो भूभुजां दूतो गच्छ गच्छ ममाग्रतः ॥४७६॥
भणनीयं स्वभूपाग्रे संनह्य त्वं स्थिरीभव ।
चित्रसेनः समायातस्त्वद्वैर्यग्निपयोधरः ॥४७७॥
गत्वा दूतेन विज्ञप्तो रत्नशेखरभूपतिः ।
आगतश्चित्रसेनोऽसौ राजन् सज्जीभव द्रुतम् ॥४७८॥
एतद्वचनमाकर्ण्य कोपप्रस्फुरिताधरः ।
चचाल सन्मुखं सद्यो रत्नशेखरभूमिपः ॥४७९॥
अन्योन्यमुभयोर्जातं सैन्ययोः किल सङ्गमं ।
योधा युद्धाङ्गणे योद्धुं सावधानाः स्थिताः पुनः ॥४८०॥
रथिका रथिभिः सार्द्धं गजस्थाश्च गजस्थितैः ।
हयस्था हयसंस्थैश्च चक्रुर्युद्धं परस्परम् ॥४८१॥
पत्रवाहप्रवाहेणाच्छादितं[1] गगनाङ्गणम् ।
किं श्रमाकुलचित्तानां वीराणामातपच्छिदे ॥४८२॥
यथा विन्ध्याद्रिमध्यस्था गजा युध्यन्ति दुर्द्धराः ।
उभयोः सैन्ययोस्तद्वत् सञ्जातं समराङ्गणम् ॥४८३॥

---

1 Z कंकपत्रप्रवा० ।

पश्यन् सङ्ग्रामकौशल्यं चित्रसेननरेश्वरः ।
रत्नशेखरसैन्यस्य प्रशंसां कुरुतेतराम् ।४८४॥
यदा सिंहपुरस्वामी सङ्ग्रामान्न निवर्तते ।
दण्डरत्नं तदा कोपादानीतं करगोचरे ॥४८५॥
परमेष्ठ्यभिधं मन्त्रं स्मृत्वा निजगुरुं पुनः ।
वामतो वसुधेशेन दण्डरत्नं च नोदितम् ॥४८६॥
वैरिसेना ततः सर्वा पतिता भूमिमण्डले ।
एक एव स्थितस्तत्र रत्नशेखरभूपतिः ॥४८७॥
तुरङ्गमात् समुत्तीर्य विनयानतमस्तकः ।
ननाम भूपतेः पादौ न हि प्रीतिर्भयं विना ॥४८८॥
करौ च कुड्मलीकृत्य भूमिजानि व्यजिज्ञपत् ।
अपराधिषु यो दण्डस्तं दण्डं कुरु मे विभो ॥४८९॥
इति श्रुत्वा धरेशेन कृपापूरितचेतसा ।
सृष्ट्या सञ्चारिते दण्डे सेना सुस्थाभवत्कृता ॥४९०॥
चित्रसेननरेशेन रत्नशेखरनामकः ।
गत्वा सिंहपुरद्रङ्गे स्थापितः कृतसेवकः ॥४९१॥
आज्ञायाः पालकं कृत्वा गृहीत्वा दण्डमद्भुतम् ।
सञ्चचालाचलाधीशः ससैन्यः स्वपुरं प्रति ॥४९२॥
वाद्यमानस्फुरद्वाद्यश्चतुरङ्गचमूवृतः ।

आददानोतुलं दण्डं सीमस्थवसुधाभुजाम् ॥४९३॥
अनुक्रमेण सम्प्राप्तः पत्तनोपान्तकानने ।
मन्त्रिणा रत्नसारेण श्रुतो राजा समागतः ॥४९४॥
भर्तुरागमनं श्रुत्वा पद्मावत्यपि हर्षतः[1] ।
उत्सवं कारयामास वसन्तपुरपत्तने ॥४९५॥
सन्मुखश्चलितो मन्त्री परिच्छदसमन्वितः ।
समस्तः पुरलोकोपि प्रमोदाञ्चितमानसः ॥४९६॥
उपायनं समादाय मिलितो मन्त्रिपुङ्गवः ।
पपात भूपतेः पादौ प्रभूतप्रेमपूरितः ॥४९७॥
भूपेन सहसोत्थाय समालिङ्ग्य च निर्भरम् ।
दत्त्वार्धमासनं तोषात्स पृष्टः कुशलादिकम् ॥४९८॥
ततोभीष्टस्य पुत्रस्य पुरस्यान्तःपुरस्य च ।
गजवाजिरथादीनां पप्रच्छ कुशलं नृपः ॥४९९॥
ततो मन्त्रिवरोपेतश्चलितो वसुधेश्वरः ।
वनक्रीडां प्रकुर्वाणो गतो गोपुरसन्निधौ ॥५००॥
धर्मसेनाभिधः पुत्र आगतः सपरिच्छदः ।
पितुः पादयुगं भक्त्या ननामोद्दामसम्मदः ॥५०१॥
आलिलिङ्ग ततो भूपः पुत्रं प्रणयपूर्वकम् ।

1 A हर्षितः evidently for हर्षतः or हर्षिता ।

भवसन्तापतापौघविनाशनसुधाकरम् ॥५०२॥
सुतरत्नं समादाय निजोत्सङ्गे निवेश्य[1] च ।
प्रविवेश विशामीशः पुरान्तः प्रवरोत्सवम् ॥५०३॥
पूज्यमानो मुदा पौरैर्गीयमानोऽङ्गनाजनैः ।
स्तूयमानो विपश्चिद्भिः प्रविष्टो नृपतिर्गृहे ॥५०४॥
सिंहासनसमासीनः सन्तोष्य वचनैः शुभैः ।
विसृज्य सैनिकान् सर्वान् जगामान्तःपुरान्तरे ॥५०५॥
दृष्टे प्राणप्रिये पद्मावती राज्ञी समुत्थिता ।
पादपद्मं मुदा पत्युः प्राणमत् प्रणयान्विता ॥५०६॥
त्रयोपि मिलितास्तत्र राजा राज्ञी च मन्त्रिराट् ।
दानशीलादिकं धर्मं सृजन्ति स्म निरन्तरम् ॥५०७॥
प्रासादे विलसन्नादे सर्वंक्षीणाष्टकर्मणाम् ।
प्रमोदात् पूजयन्ति स्म प्रतिमाः प्रतिवासरम् ॥५०८॥
सम्यक्त्वपूर्वकं लात्वा व्रतानि द्वादशादरात् ।
संसेवन्ते स्म साधूनां भावतश्चरणानमी ॥५०९॥
पूर्वपुण्यप्रभावेन प्राप्तानि विशदाशयाः ।
राज्यसौख्यान्यखण्डानि भुञ्जन्ति[2] स्म त्रयोप्यमी ॥५१०॥
पुण्यात्मानस्त्रयोन्येद्युः सुखासीना गृहान्तरे ।

1 A निविस्य; B निविश्य । 2 A भुंजंति; Z भुंजति ।

प्रवृत्तिं रचयामासुः पल्यङ्कस्य प्रमोदतः ॥५११॥
यदि पल्यङ्करत्नस्य प्रभावः प्रवरो भवेत् ।
अनेकानि च तीर्थानि न क्रियन्तेधुना कथम् ॥५१२॥
बभाषे भूपतिर्देवि नान्यथा तस्य भाषितम् ।
दण्डः परीक्षितः पूर्वमधुनायं परीक्ष्यते ॥५१३॥
समग्रामपि सामग्रीं पूजोपकरणादिकाम् ।
समादाय सदानन्दात् पल्यङ्कं ते स्थितास्त्रयः ॥५१४॥
अष्टापदाभिधं तीर्थं स्मृत्वा हुङ्कारमात्रतः ।
उत्पपात स पल्यङ्को वेगतो गगनाङ्गणे ॥५१५॥
पुण्यात्मानस्त्रयोप्येते पल्यङ्कोपरिसंस्थिताः ।
पश्यन्तो वसुधाश्चर्यं[1] प्राप्ता अष्टापदाचले ॥५१६॥
तत्रैकयोजनायामं चतुर्द्वारं सतोरणम् ।
गव्यूतत्रितयोत्तुङ्गं भरतेश्वरकारितम् ॥५१७॥
शातकुम्भमयं कुम्भसुन्दरं[2] ध्वजराजितम् ।
प्रासादं जगदीशानां ददृशुस्ते त्रयो मुदा ॥५१८॥
स्वर्गमण्डपसङ्काशा मण्डपास्तत्पुरो वराः ।
तदन्तः पीठिका देवच्छन्दके वेदिकास्तथा ॥५१९॥
नित्यार्हत्प्रतिमा रत्नमय्यो मञ्जुलपीठिकाः ।

1 Z वासुधा० । 2 Z कुम्भं सुन्दरं ।

प्रातिहार्याष्टकोपेताश्चतस्रोऽब्जासनस्थिताः ॥५२०॥
स्वस्वमानाङ्कवर्णाढ्याश्चतुर्विंशतिरर्हताम् ।
देवच्छन्दे विराजन्ते मूर्तयो मणिरत्नजाः ॥५२१॥
छत्रत्रयं तदुपरि प्रत्येकमपि चामरे ।
यक्षा आराधकाश्चान्ये शोभन्ते किन्नरध्वजाः ॥५२२॥
बन्धूनां पूर्वजानां च भगिन्योरपि मूर्तयः ।
कारिता भरतेशेन भक्तिप्रह्वा निजापि च ॥५२३॥
प्रासादात् परितश्चैत्यद्रुमाः कल्पद्रुमा अपि ।
सरांसि दीर्घिका वाप्यो मठाः सन्ति मनोरमाः ॥५२४॥
चैत्याद्बहिः स्तूपमेकमुच्चं रत्नमयं विभोः ।
बन्धूनामपि चान्येषाम् भान्ति स्तूपानि पर्वते ॥५२५॥
इत्यादिराजिते सिंहनिषद्याख्यजिनालये ।
नैषेधिकीत्रयीमुक्त्वा प्रविष्टाः शुचयस्त्रयः ॥५२६॥
जिनान् प्रदक्षिणीकृत्य प्रतिमाः पावनैर्जलैः ।
संस्नाप्य मृदुभिर्वस्त्रैर्ममृजुर्विलसन्मृजान् ॥५२७॥
काश्मीरभवकर्पूरकस्तूरीचन्दनद्रवैः ।
पाणिभिः परमेशानां मुदा चक्रुर्विलेपनम् ॥५२८॥
पुष्पौघैः पूजयामासुस्ते जिनेशान् सुगन्धिभिः ।
कुर्वन्ति स्म ततो धूपं सार्वाग्रेगुरुसम्भवम् ॥५२९॥

तण्डुलैर्मणिपीठे च वितेनुर्मङ्गलाष्टकम् ।
जिनाग्रे ढौकयामासुर्नाङ्गल्यादिफलावलीम् ॥५३०॥
हेमदण्डमनोहारिध्वजारोपं वितेनिरे ।
ततो मङ्गलदीपेन साकमारात्रिकं व्यधुः ॥५३१॥
अथ भक्तिभरोत्फुल्लवपुषस्ते त्रयोपि हि ।
गुणौघं वर्णयामासुरानन्दात् सकलार्हताम् ॥५३२॥
सदानन्दरमाभोगरमाप्राणप्रियोपमाः ।
भवन्तु परमात्मानः परमाधीशताकृते ॥५३३॥
प्रमादप्रभवोन्मादवैरिवारनिवारकाः ।
सर्वेषां सुखदाः सर्वे सर्वदा सर्वदर्शिनः ॥५३४॥
दुष्टाष्टकर्मनिर्मुक्ता मुक्ता निर्मलकीर्तयः ।
विज्ञातत्रिजगद्भावा भावायाभयदाः सताम् ॥५३५॥
देशनास्वर्नदीनीरपवित्रितजगत्त्रयाः ।
जयन्तु जगतामीशाः प्राप्तानन्तचतुष्टयाः ॥५३६॥
कल्याणावलिकर्तारो हर्तारो रागविद्विषाम् ।
नाभेयाद्याश्च वीरान्ता रमन्तां मम मानसे ॥५३७॥
अष्टापदे जिनाधीशान् ये वन्दन्ते स्वलब्धितः ।
तस्मिन्नेव भवे यान्ति मानवास्ते महोदयम् ॥५३८॥
एवं विशारदैर्नूता विश्वत्रितयविश्रुताः ।

बोधिबीजकृते कामं सतां सन्तु स्वयम्भुवः ॥५३९॥
इति स्तुत्वा जिनाधीशान् कृत्वा च सफलं जनुः ।
पुनः पल्यङ्कमारुह्यागता निजपुरे त्रयः ॥५४०॥
पुण्यप्रभावतः प्राप्तं मित्रपत्नीसमन्वितः ।
पालयामास राज्यं स्वं भूपतिर्गतकण्टकम् ॥५४१॥
अन्यदा पर्षदासीनं सामन्तादिकसेवितम् ।
आरामिकः समागत्य भूमिपालं व्यजिज्ञपत् ॥५४२॥
स्वामिन् मनोरमोद्याने सुरासुरनिषेवितः[1] ।
समागात् केवलज्ञानी द्रुमसारमुनीश्वरः ॥५४३॥
इति श्रुत्वा महीनेता वसनाभरणादिकम् ।
सन्तुष्टः प्रददौ तस्मै साध्वागमनशंसिने ५४४॥
भूरिभावेन सर्वर्द्ध्या पुत्रमित्रकलत्रयुक् ।
नन्तुं साधुपदाम्भोजं जगाम जगतीपतिः । ॥५४५॥
तं त्रिः प्रदक्षिणीकृत्य नत्वा केवलिनं मुदा ।
परिवारवृतो राजा यथास्थानमुपाविशत् ॥५४६॥
समारेभे निरारम्भा साधुना धर्मदेशना ।
भवदुस्तापपाथोधिनिस्तारणतरीसमा ॥५४७॥

यथा—

1 A निषेविते ।

चत्तारि परमंगाणि दुल्लहाणीह जंतुणां ।
माणुसत्तं सुई सद्धा संजमंमि य[1] वीरियं ॥५४८॥
जरा जाव न पीलेइ वाही जाव न वड्ढइ ।
जाविंदिया[2] न हायंति ताव धम्मं समायरे ॥५४९॥
संबुज्झह किं न बुज्झह संबोही खलु पेच्च दुल्लहा ।
नो हुवणमंति राइओ नो सुलहं पुणरावि जीवियं ॥५५०॥
इत्यादिदेशनां श्रुत्वा प्रतिबुद्धास्त्रयोप्यमी ।
धर्मसेनसुतो राज्ञा राज्ये संस्थापितो निजे ॥५५१॥
मन्त्रिणा रत्नसारेण सुतः सुमतिनामकः ।
सुराचार्यसमप्रज्ञः समस्थापि निजे पदे ॥५५२॥
त्यक्त्वा राज्यर्द्धिदेशादीन् दत्वा दानं यथोचितम् ।
कृत्वा तीर्थंकृतां पूजां श्रित्वा संवेगमुत्तमम् ॥५५३॥
समं मन्त्रिकलत्राभ्यां चित्रसेननरेश्वरः ।
दमसारगुरोः पार्श्वे जग्राह व्रतमादरात् ॥५५४॥
चिरं चारित्रमाराध्य कृत्वान्तेनशनं तथा ।
ते प्राप्ता अच्युते कल्पे सामुदायिककर्मतः ॥५५५॥
समुदायाद्दयाद्येतैर्यत् कृतं सुकृतं त्रिभिः ।
[illegible]यसुखं भुक्त्वा क्रमाद् यास्यन्ति ते शिवम् ॥५५६॥

---

[1] [illegible] omits य । 2 A जावंदिया ।

शीलपालनतो ह्येतैर्भुक्त्वा राज्यश्रियं वराम् ।
जिनधर्मं समाराध्य सम्प्राप्तं स्वर्गजं[1] सुखम् ॥५५७॥
दुष्टारिष्टानि नश्यन्ति नृणां शीलप्रभावतः ।
शाकिनीभूतवेतालसिंहसर्पभयानि च ॥५५८॥
राज्यर्द्धिर्वाञ्छिता लक्ष्मी रम्या रामा वराः सुताः ।
दीर्घायुर्विशदा कीर्तिः प्राप्यन्ते शीलपालनात् ॥५५९॥
इत्थं धराधीश्वरचित्रसेन-
पद्मावतीशीलभवप्रभावम् ।
निशम्य लोकैः किल शीलनीयं
शीलं सदानन्दकरं सदैव ॥५६०॥
तपगणगगनविभासनगगनध्वजसन्निभाः सुवर्णविभाः ।
श्रीविजयदानसूरीश्वरा बभूवुर्युगप्रवराः ॥५६१॥
तच्छिष्यजगन्मल्लाभिधविबुधा लब्धवर्णगजमल्लाः ।
तच्छिष्यबुद्धिविजयाभिधेन रचिता कथा सुखदा ॥५६२॥
श्रीहीरविजयसूरीश्वरपट्टोदयगिरिद्युमणितुल्ये[2] ।
सम्प्रति विराजमाने सूरिश्रीविजयसेनगुरौ ॥५६३॥
नभरसरसचन्द्राब्दे श्रावणासितपञ्चमीतिथौ[3] सोमे ।
श्रीचित्रसेनपद्मावतीकथा जयतु बुद्धिविजयकृता ॥५६४॥

॥ इति श्रीचित्रसेनपद्मावतीचरित्रं सम्पूर्णम ॥

A स्वर्गजसुखं । 2 A०पट्टस्वर्णशैलदेवतरौ । 3Z ०सिते पञ्च० ।